
॥ भाई परमानन्दः ॥



श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

॥ भाई परमानन्दः ॥

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

लेखकः

आरती ओझा

अनुवादकः

प्रा. पङ्कजः ठाकरः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

परामर्शनसमितिः -

डॉ. नरेन्द्रकुमार पण्ड्या

डॉ. देवेन्द्रनाथः पाण्डेयः

प्रा. ललितः पटेलः

डॉ. भावप्रकाशः गांधी

कार्यसंयोजकः -

श्री दशरथः जादवः

(उपकुलसचिवः)

प्रथमं संस्करणम् - फरवरी, २०१३

प्रतयः - ३००

ISBN -

मूल्यम् - ५०

मुद्रकः -

एच. के ओफसेट, वेरावलम्

॥ शुभाशंसनम् ॥

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे ''**स्वर्णिमगुजरातजयन्ती**'- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां '**विश्वसंस्कृतपुस्तकमेलायां**' श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्यगांधीनगरद्वारा प्रकाशितायाः '**सरफरोशश्रेण्याः**' कतिपयगुजरातीभाषायां प्रणीतग्रन्थानां संस्कृतभाषायाम् एकस्मिन् अभियानेऽनुवादं कारयित्वा तेषां प्रकाशनमपि विश्वविद्यालयः करोति। तदन्वयेनान्येषां नवोदितलेखकानां प्राप्तप्रतिष्ठानां लेखकानाञ्चा-प्रकाशितपुस्तकानां प्रकाशनमपि कर्तुं प्रवृत्तोऽस्ति। अस्मिन्नेव सन्दर्भे **आरती ओझा**रचितोऽयं **प्रा. पङ्कजठाकरमहोदयेन** अनुदितोऽयं **भाई परमानन्दः** नामधेयः ग्रन्थः सादरं प्रकाश्यते। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

॥ जयतु सोमनाथः जयतु संस्कृतम् ॥

प्रो. पंकज एल. जानी

कुलपतिः

अनुक्रमणिका

१	शैशवस्य धनं – संस्कारः	०५–०७
२	ध्येयपथे अग्रेसरः	०८–१०
३	विश्वधर्मः – मानवधर्मः – हिन्दुधर्मः	११–१२
४	भारतस्य यथार्थ–इतिहासाय	१३–१५
५	आङ्ग्लशासकस्य खेटः	१६–१८
६	अमेरिकदेशस्य यात्रा	१९–२४
७	विद्यार्थी जातः	२८–२७
८	'गद्दर'– आन्दोलनम्	२८–३०
९	देशभक्तिनिमित्तं दण्डः	३१–३२
१०	न्यायरूपेण नाटकम्	३३–३६
११	कारागृहे बन्धकः भाईपरमानन्दः	३७–४०
१२	देशनिष्कसनस्य दण्डः	४१–४४
१३	अन्दामानस्य आतङ्कः	४५–४७
१४	अमानुषी–व्यवहारे अपि मानवतारक्षणम्	४८–५१
१५	महायुद्ध–दर्शनस्य महेच्छा	५२–५५
१६	मृत्यवे सज्जता – लब्धा मुक्तिः	५६–६०
१७	स्वदेशागमनम्	६१–६३
१८	सिद्धान्तनिष्ठायाः अर्चकः	६४–६६
१९	विभक्तभारतं चिरप्रयाणस्य निमित्तम्	६७–६८

***

१

शैशवस्य धनं – संस्कारः

हे ईश्वर! भारतवर्षे शतवारं मम जन्म भवेत् ।
कारणं सदैव मृत्युरूपं देशोपकारकं कर्म भवेत् ।।

हुतात्मानः राष्ट्रस्य निष्कामाः प्रतिहारिणः, प्रेरणायाः अमर–स्रोतःस्वरूपाः, नवनिर्माणाय कर्तव्यपथि अग्रेसरणस्य सन्देशवाहकाः भवन्ति। यत्र राष्ट्र–निर्माणहेतवे रक्तस्य अन्तिमबिन्दुं यावत् बलिदानं विहाय नान्या कापि प्रतिज्ञा भवति, तत्र इतिहासस्य एतादृशानि पात्राणि कथं विस्मर्तुं शक्यानि ?

स्वतन्त्रतायै ये महतीं तपश्चर्यां, त्यागं बलिदानं च कृतवन्तः तेषां विस्मरण--कारणेन अद्य सर्वत्र स्वार्थभावनायाः नग्नं नृत्यं दृश्यते। अस्याः विस्मृतेः बहिरायामः चेत् ....

इ.स.१६७५दिसम्बरमासस्य १६दिनाङ्कस्य ऐतिहासिकं दिनं स्मृतौ आयाति । पुराणप्रसिद्धायाः देहलीनगर्याः विख्याते उत्से आराभिः मस्तकं विशीर्णं कारयित्वा स्वधर्मस्य रक्षायाः महान्तं सङ्कल्पं पूर्णं कर्तुं हुतात्मीभूतस्य भ्रातुः मतिदासस्य वीरगतेः दिनम्। भ्रातुः मतिदासस्य कुटुम्बे प्रायः शताब्दीद्वयानन्तरम् अर्थात् १८७६मध्ये जेलम्–जनपदे एकस्य महापुरुषस्य जन्म अभवत्। तस्य नाम आसीत् परमानन्दः ।

एकस्मिन् निर्धनकुटुम्बे जन्म जातं किन्तु आर्थिक–दारिद्र्येण किं संस्कारेषु दरिद्रता आयाति वा? मातरं विहाय नान्यः कश्चन आधारः आसीत् अस्य बालस्य समीपे । जीवनं साधुत्व–सरलता–परोपकारवृत्तीनाम् आदर्शरूपं भवेत् तादृशे बालपालने मातुः महत्त्वपूर्णं योगदानम् आसीत् ।

प्राचीनसमये भारते अष्टमे वा दशमे वर्षे यज्ञोपवीतसंस्कारः भवति स्म । इत्थं हि मन्यते स्म यत् एतद्वयस्कः बालः स्वात्मानं रक्षितुं समर्थः भवति। यज्ञोपवीतसंस्कारयुक्तस्य बालस्य अपरं जन्म आरब्धम् इति प्रचलिता

मान्यता आसीत् ।

किन्तु परमानन्दस्य जीवने आत्म-परिरक्षणस्य स्थितिः चतुर्दशे वर्षे आपतिता । कीदृशी विधातुः विचित्रता ? चतुर्दशे सुकुमारे वयसि परमानन्दस्य जीवनस्य जननीरूपम् एकमात्रं शिरश्छत्रं दैवेन परिहृतम् !

एकाकी निराधारः च परमानन्दः ज्वराक्रान्तः जातः । रुग्णत्ववशात् शारीरिकी मानसिकी च दुर्बलता समागता । मातृवियोगस्य असह्यः आघातः आसीत् तत्र क्षते प्रहारवत् जनन्या परिरक्षितं धनं तस्याः स्वर्गवासानन्तरम् उत्तरक्रियायां व्ययीभूतम् ।

'अरक्षितं तिष्ठति दिष्टरक्षितम्' उक्तिः एषा अन्वर्था जाता । परमात्मनः कृपया परमानन्दस्य जीवने व्याप्तः शून्यावकाशः नैराश्यं च आर्यसमाजस्य तेजस्वि-विचारैः दूरं गतम् ।

सद्विचाराणां प्रभावः कियान् सुदृढः भवति ? आर्यसमाजस्य विचारैः परमानन्दः तन्मयः भवति स्म । तस्य सहाध्यायिनः छात्राः परीक्षासमये यदा अभ्यास-ग्रन्थान् पठन्ति तदा परमानन्दः 'सत्यार्थप्रकाशस्य','पण्डित-लेखराजस्य' पुस्तकानां च पठने रतः भवति स्म ।

बाल-परमानन्दः लाला-हंसराजाय पत्रम् लिखितवान् येन तस्य ग्रामे एकः उपदेशकः समायातः । अनन्तरं किं समाजस्य स्थापनायां विलम्बः भवेत् खलु ?

आर्यसमाजस्य ईदृशः अपरिमेयः प्रभावः बालमानसस्योपरि कैः कारणैः अभवत् ? परमानन्दस्य जन्मनः वर्षात् पूर्वं महर्षिः दयानन्दः सरस्वती 'आर्यसमाजस्य' स्थापनां कृतवान् ।

अज्ञानतायाः अन्धकारे ओतप्रोतं धार्मिकं जीवनं, रूढिग्रस्तः समाजः, वैदेशिकानां दासत्वस्य शृङ्खला इत्येतैः बद्धं भारतराष्ट्रं समृद्धं कर्तुं दयानन्देन भारतवर्षस्य परिव्राजकत्वं स्वीकृत्य प्रवासः आरब्धः ।

स्त्रीशिक्षणम्, अस्पृश्यता-निवारणम्, जवनिका-प्रथा-निवारणम्,

बालविवाह-विरोधः, ब्रह्मचर्य-पालनस्य प्रभूतं समर्थनम्, स्वदेशी-स्वभाषा-स्वसभ्यतानां महत्त्वस्य स्थापना, जन्मगतायाः वर्णव्यवस्थायाः स्थाने कर्मगत-वर्णव्यवस्थायाः समर्थनम् इत्यादीनां विचाराणां प्रचाराय रचनात्मकानि कार्याणि आर्यसमाजेन आरब्धानि ।

गोहत्याप्रतिबन्धाय महर्षिः दयानन्दः हस्ताक्षरान्दोलनम् आरभ्य स्वयमेव आवेदनपत्रम् आङ्ग्लाधिकारिणे लाधि दत्तवान् ।

१८८३वर्षे महर्षिः स्वप्रचारयात्रानिमित्तं जोधपुरं प्राप्तवान् । तत्रत्याय महाराजाय धर्मोपदेशं दत्तवान् किन्तु महाराजस्य चरित्रहीनत्वं प्रति महर्षिः दुःखितः आसीत् । नन्हीजान-नाम्नी गणिका महर्षिः स्वमार्गकण्टकं विज्ञाय दुग्धे काच-कणानि मिश्रीकृत्य महर्षिम् अपाययत् । इतः पूर्वं महर्षिः जीवने त्रयोदशवारं विषपानं कृतवान् आसीत् । किन्तु एतद् विषं घातकं जातम् । भूरिशः उपचारेषु सत्सु अपि कार्तिकी-अमावास्या(दीपावली)सन्-१८८३दिने सायङ्काले ६वादने भारतस्य सुपुत्रः, मनुष्यमात्रस्य हितचिन्तकः, आदित्य-ब्रह्मचारी, वेदेषु अद्वितीयः विद्वान्, महर्षिः दयानन्दः सत्यधर्मप्रचारस्य वेद्यां वीरगतिं प्राप्तवान् ।

स्वजीवनं दीपकरूपेण ज्वालयित्वा सत्यस्य प्रकाशेन प्रज्वालयितृणाम् एका शृङ्खला आर्यसमाजे निर्मिता । अस्याः शृङ्खलायाः महत्त्वपूर्णः आधारस्तम्भरूपः भाई परमानन्दः पारिवारिक-सङ्कटेभ्यः राष्ट्रिय-सङ्कटानाम् उद्धारकः भवितुं प्रेरणां प्राप्तवान् ।

०००००

२

ध्येयपथे अग्रेसरः

आर्यसमाजस्य शालायां भाई परमानन्दस्य अभ्यासः आरब्धः। शिक्षणेतरसमये आर्यसमाजस्य सिद्धान्तानाम् आदर्शानां च सः अभ्यासं कृतवान्।

पठनेन भाई परमानन्दस्य विचारेषु आमूलं परिवर्तनम् आगतम्।

'त्यागकर हम शेष जीवन की, सुसंचित कामनायें

ध्येय के अनुरूप जीवन, हम सभी अपना बनायें

शुद्ध विकसित पूर्णजीवन-पुष्प से हो राष्ट्र अर्चन'

अस्याः काव्यपंक्तेः भावः भाई परमानन्दस्य हृदये सुदृढतया आकारितः जातः।

आर्यसमाजस्य प्रचाराय स्वीय-समग्र-जीवनसमर्पणस्य निर्णयं भाई परमानन्दः लघुवयसि कृतवान्। शालायाः अभ्यासं त्यक्त्वा, यस्यां शालायाम् आर्यसमाजस्य उपदेशकाः पाण्डित्यं प्राप्तुं वेद-अष्टाध्यायी-आदिग्रन्थान् पठन्ति स्म तस्यां शालायां सः शिक्षार्थं प्रवेशं लब्धवान्।

ध्येयपथः सदा शतविघ्नयुक्तः भवति। ध्येयपथिकस्य पुनः पुनः परीक्षा भवति। तद्वत् भाई परमानन्दस्य आर्यसमाज-उपदेशकानां निर्मात्री पाठशाला सुदीर्घं न चलिता। अतः सः पुनः माध्यमिकशालायाम् अभ्यासाय प्रवेशं कृतवान्।

परमानन्दस्य जीवने बाल्यावस्थातः एव कठोर-परिश्रमस्य गुणः सिक्तः आसीत् अतः सः प्रवेशिका-परीक्षायम् उत्तीर्णः।

एकः चिकित्सकरूपेण व्रतधारी भूत्वा आर्यसमाजमाध्यमेन सेवाव्रतिरूपेण भवितव्यम् इति भाई परमानन्दस्य चिन्तनम् आसीत्। किन्तु माता-भारती तस्य एतस्य सुपुत्रस्य कृते कामपि भिन्नां योजनां निर्मितवती आसीत् खलु! आर्यसमाजस्य कार्यकर्तृणां मध्ये मतभेदः उत्पन्नः येन 'दयानन्द-एँग्लो-वैदिक-महाविद्यालयस्य'

अस्तित्वे भयं समागतम्। अतः लाला-हंसराजेन सह परमानन्दः तेन महाविद्यालयेन संलग्नायाः शालायाः संरक्षणे समग्रतया प्रवृत्तः अभवत्।

सत्कार्यं संरक्षितुं ,सत्कार्यस्य वृद्ध्यर्थं ये कार्यं कुर्वन्ति तैः स्वजीवने कश्चित् त्यागः तु करणीयः भवत्येव। महाविद्यालयस्य शालायाः च संरक्षणस्य कार्ये अतिव्यस्तः आसीत् अतः स्वीयं महाविद्यालयस्य अभ्यासं सुचारुतया कर्तुं न शक्तवान्।

प्रवेशिकायाः परीक्षाम् उत्तीर्य एकं वर्षं यावत् जोधपुरे निवासं कृत्वा तत्र राजपूत-विद्यालयस्य स्थापना कृता। किन्तु तत्रत्याः सत्तायाः दुर्व्यवहारेण व्यथितः भूत्वा विद्यालयं त्यक्तवान्।

स्नातक(बी.ए.)परीक्षा अतीव निकटे आसीत् अतः भूरिप्रयत्नं कृत्वा परीक्षायां साफल्यं प्राप्तम्। शैक्षिकपरीक्षायां तु साफल्यं प्राप्तं किन्तु जीवनस्य परीक्षायाम् ?

स्नातकम् उत्तीर्य विवाहस्य प्रश्नः उपस्थितः। दीर्घकालं यावत् भाई परमानन्दः विवाहविषये चिन्तनं कृतवान्। कस्यापि नवयुवकस्य कृते अविवाहितस्य स्थित्वा कार्यकरणेन चारित्र्यात् पतनाद् भयं भवति। अविवाहितस्य महान् भयः भवति इति भाईजी अन्वभवत्। अतः सः विवाहं कर्तुं निर्णीतवान्। समाजमध्ये यः कार्यं करोति तेन व्यापकः, शुद्धः च विचारः कर्तव्यः भवत्येव।

विवाहानन्तरं 'एबटाबादस्य' आङ्ग्ल-संस्कृतशालायाम् आचार्यरूपेण वर्षद्वयम् अतिष्ठत्। तत्र अनुस्नातकं कर्तुम् इच्छा जाता अतः कलिकातायाम् एकवर्षं यावत् अभ्यासः कृतः किन्तु अन्ते पञ्जाबप्रान्तं पुनरागमनीयम् आपतितम्। सन्१९०२मध्ये अनुस्नातके सफलतां प्राप्तवान्।

विद्यार्थि-जीवने धर्मसेवायाः समाजसेवायाः सन्ततं कार्यं कृत्वा भाई परमानन्दः स्वचिन्तनानि व्यवहारे स्थापनस्य उत्कृष्टम् उदाहरणं प्रस्तुतवान्।

अनुस्नातकस्य पदवीं प्राप्य यः विद्यार्थि-जीवने अपि लोकसेवायाः एकमपि प्रसङ्गं न त्यक्तवान् सः भाईजी किं स्वस्य ऐश्वर्यस्य कृते भौतिक-भोगार्थं वा

आङ्ग्ल-सर्वकारस्य दासत्वं स्वीकुर्यात् खलु?

सर्वाणि प्रलोभनानि मत्तः करणत सर्वथा दूरीकृत्य केवलं पञ्चसप्ततिः रूप्यकाणां मासिक-जीवनयापनस्य मानधनेन सह 'डी.ए.वी.-महाविद्यालय-लाहोर'मध्ये आजीवनम् अध्यापनकार्यं करणीयम् इति सङ्कल्पेन सह सेवायां नियुक्तः ।

तेषु दिवसेषु राष्ट्रिय-जागरणस्य अग्रदूतः आर्यसमाजः आसीत् । सर्वकारस्य लवमात्रमपि साहार्य्यम् अस्वीकृत्य डी.ए.वी.महाविद्यालयः तादृशं वातावरणम् उद्भावयितुं समर्थः जातः येन आत्मविश्वासस्य स्वाभाविकी स्फूरणा भवति स्म ।

भाई परमानन्दस्य लाला लजपतरायस्य च संयुक्त-परिश्रमस्य एषः परिणामः आसीत् यत् अयं महाविद्यालयः एकं तादृशं केन्द्रं जातं यत्र प्रवाहितः वायुः शुष्कहृदये अपि राष्ट्रभक्तेः सामाजिकोद्धारस्य भावनाः अङ्कुरिताः करोति स्म ।

'भारत जननीने किया वात्सल्य से पालन हमारा,

है कृपा इसकी मिला यह प्राण तन जीवन हमारा,

भक्ति से हम हो समर्पित बस यही अधिकार है ।'

एतान् शब्दान् देवस्वरूपः भाई-परमानन्दः सार्थकान् कृतवान् !

oooo

३

विश्वधर्मः - मानवधर्मः - हिन्दुधर्मः

'भाग्यविधायि निजार्जितकर्म

यत्र श्रमः श्रियमर्जयति ।

त्यागधनानां तपोनिधीनां

गाथां गायति कविवाणी ।।

वर्षत्रयात्मके अतिलघुसमयाभ्यान्तरे महाविद्यालयस्य अध्यापनकार्येण सह पञ्जाबप्रान्तस्य नैकमपि नगरं तादृशम् आसीत् यत्र भाई-परमानन्दः आर्यसमाजस्य प्रचारकार्यार्थं गतवान् न स्यात् । यत्र यत्र आर्यसमाजस्य कार्यं मन्दम् अनुभूयते तत्र तत्र सेवायाः अयं जागृतः योद्धा लोकोपयोगि-कार्याणि पूरयितुं च गच्छति । भाई-परमानन्दः स्वोत्साहेन तपोबलेन च नूतनां प्रेरणां जनयति स्म ।

तेषु दिवसेषु दक्षिण-आफ्रिक-देशस्थेभ्यः प्रवासि-भारतीयानां पक्षतः एकस्य व्रतधारिणः प्रेषणाय निमन्त्रणं सम्प्राप्तम् । यस्य हृदये आर्यजातेः जागरणस्य प्रचण्डः अग्निः प्रस्फुटितः तादृशं भाई-परमानन्दं विहाय कः अन्यः योग्यः प्रचारकः लभेत ?

लाला-हंसराजः भाई-परमानन्दं सर्वाधिकं योग्यं प्रचारकं ज्ञात्वा तम् आफ्रिकदेशेषु आर्यसमाजस्य वैदिकधर्मस्य च प्रचारार्थं प्रेषितवान् । भाई-परमानन्दस्य जीवने एकं नाट्यात्मकं परिवर्तनं निर्मितम् ।

भाई-परमानन्दः मोम्बासा, नाईरोबी, ट्रान्स्वाल्, केपकोलोनी इत्यादिषु प्रसिद्धस्थानेषु मासान् यावत् भ्रमणं कृत्वा प्रवचनानि कृतवान् । आर्यसमाजस्य सिद्धान्तान् उपदिष्टवान् तथा च 'दयानन्द-एँग्लो-वैदिकमहाविद्यालयस्य' कृते धनं सङ्गृहीतवान् ।

महात्म-गान्धी तस्मिन् समये दक्षिण-आफ्रिकायां निवासं करोति स्म ।

एकमासं यावत् भाई-परमानन्दः गान्धिना सह उषितवान् ।

एतौ उभौ महानुभावौ परस्परं ध्येयनिष्ठया प्रभावितौ जातौ । गच्छता कालेन राजनैतिक-चिन्तने द्वयोः मध्ये महत् अन्तरस्य निर्माणं जातं किन्तु उभयोः महापुरुषयोः सख्यभावः पूर्ववत् स्थितः ।

भाई-परमानन्दः इंग्लैण्डदेशं गन्तुम् इच्छां कृतवान् तदा महात्मा द्वित्राणि संस्तुतिपत्राणि लिखित्वा दत्तवान् तेषु एकं पत्रं श्रीश्यामजी-कृष्ण-वर्माणम् उद्दिश्य अपि आसीत् । लंडने 'इंडिया हाउस्'स्थापयित्वा श्रीश्यामजीकृष्णवर्मा छात्रेषु आङ्ग्लशासनं प्रति असन्तोषं प्रदर्शयति स्म ।

भाई-परमानन्दः लंडनं गतवान् । 'इंडिया हाउस्'मध्ये एव निवासं कृतवान् । किन्तु श्रीश्यामजीकृष्णवर्मणः लाला-हरदयालस्य च योजनातः प्रभावतः च सर्वथा निर्लेपः स्थितः ।

भाई-परमानन्दस्य एकः सिद्धान्तः आसीत् -

'जागृतं करवाम विस्मृतं भारतं

इष्टमार्गे च परि पुनः सञ्चालितम् ।

लोकः अवलोकयेत् प्रसन्नः भूत्वा

नवभारतस्य प्रेरणा प्रतिमाप्रभुम् ॥'

इमां काव्यपंक्तिं साकारितां कर्तुं भाई-परमानन्दः सक्रियः भूत्वा लंडने स्वकार्ये मग्नः अभवत् ।

ooo

४

भारतस्य सत्येति-इतिहासाय

स्वामी विवेकानन्दः उक्तवान् यत् -

'लघुचेतोभ्यः जनेभ्यः भवन्तः किमपि आशास्तुं न शक्नुवन्ति। तैः संसारे न किमपि भविष्यति। समुद्रस्य पारंगत्तुं लौहसदृशं मनोबलम् आवश्यकम्। तद्विना लङ्का विजेतुं न शक्यते। ईदृशं लौहमयं मनोबलं धारणीयं येन पर्वताः अपि भेत्तुं शक्याः भवेयुः।'

एतादृशेन दृढमनोबलेन सह भाई-परमानन्दः आफ्रिकदेशानां प्रवासतः आङ्ग्ल-सर्वकारस्य राजधानीं लंडनं प्राप्तवान्।

'इंडिया हाउस्'मध्ये स्थित्वा भाई-परमानन्दः 'ब्रिटिश्-सङ्ग्रहालयस्य' प्रसिद्ध-ग्रन्थालयस्य लाभं गृहीत्वा हिन्दुधर्मस्य यथार्थेतिहासं निष्पक्षदृष्ट्या लेखनाय प्रारम्भः कृतः।

प्रारम्भिकं वास्तविकं च घटनायाः वृत्तं पठित्वा भाई-परमानन्दस्य मनसि एकः निश्चयः स्पष्टः जातः यत् भारतवर्षस्य समग्रः इतिहासः एकं विशिष्टम् उद्देश्यं पुरतः निधाय लिखितः अस्ति। अस्मिन् लेखे भारतीयाः तुच्छाः वर्णिताः। सहैव भारतीयानाम् अवस्था तथा च तेषाम् उन्नतेरवनतेश्च कारणानि साकूतं दृष्टितः अदृष्टानि कृतानि विद्यन्ते। केवलं विजेतृणामेव जनानां चरित्रस्य वीरतायाः गाथाः भारतस्य इतिहासरूपेण लिखिताः।

भाई-परमानन्दः प्रातः आरभ्य सायं यावत् पुष्कलं परिश्रमं कृत्वा पुस्तकालये उपविश्य सार्धैकवर्षं यावत् अनेकेषां ग्रन्थानाम् अध्ययनं कृत्वा एकं निबन्धं रचितवान्।

एतस्य निबन्धस्य आधारेण भावि-समये आनुकूल्यं भवेत् तदा सविस्तरम् इतिहासलेखनं कर्तव्यम् इति भाई-परमानन्दः सङ्कल्पं कृतवान्। या लेखनसामग्री सज्जीकृता आसीत् तस्याः आधारेण 'हिन्दुस्तानमां ब्रिटिश् राज्यनो अभ्युदय' (हिन्दुस्ताने आङ्ग्लशासनस्य अभ्युदयः) इति शीर्षकेण सह लंडन-विश्वविद्यालये

एम.ए.पदवी-प्राप्त्यर्थं निबन्धः प्रेषितः। सङ्कुचिताः द्वेषयुक्ताः च आङ्ग्ल-प्राध्यापकाः स्व-स्वभावानुगुणं गुरुताग्रन्थियुक्तं निर्णयं कृत्वा निबन्धं निराकृतवन्तः।

सङ्घर्षस्य विविधानि रूपाणि भवन्ति। यस्मिन् कालखण्डे भाई-परमानन्दः स्वस्य साहित्यस्य इतिहास-संशोधनस्य च प्रवृत्तौ निमग्नः आसीत् तस्मिन् समये भारते मुख्यतः बङ्गाले पञ्जाबे लंडने च क्रान्तिवीरैः आङ्ग्लशासकानां मनसि महती व्याकुलता उत्पादिता आसीत्।

१९०७तमवर्षस्य मईमासे सन्१८५७विप्लवस्य प्रथम-स्वातंत्र्यसङ्ग्रामस्य पञ्चाशत् वर्षाणि पूर्णानि भवन्ति स्म। भारते व्याप्यमानानि लब्ध-वेगानि स्वातंत्र्य-आन्दोलनानि दृष्ट्वा लंडनस्थितैः वृत्तपत्रैः इदं लेखितुम् आरब्धं यत् - 'यथा प्लासी-युद्धस्य १५०वर्षाणि अनन्तरं १८५७विप्लवः अभवत् तथैव १८५७विप्लवस्य पञ्चाशद् वर्षाणि पूर्णानि भवन्ति अतः इदमपि अघटितं घटिष्यति एव।

स्वदेशीयस्वीकारः विदेशीय-वस्तूनां बहिष्कारस्य प्रचण्डम् आन्दोलनं बङ्गालतः आरभ्य पञ्जाबं यावत् आगतम्। ११मई-दिनाङ्के कापि घटना भविष्यति इति आङ्ग्लशासकानां मनसि भयम् आसीत् अतः लाला-लजपतरायं सरदार-अजितसिंहं च गृहीत्वा बर्माप्रान्ते दृष्टिबन्धने निक्षिप्तवन्तः। उभयोः बन्धनस्य वृत्तान्तेन भारते तीव्रः आक्रोशः व्याप्तः। इंग्लैण्डमध्ये अभ्यासं कुर्वत्सु छात्रेषु अपि तीव्रः रोषः व्याप्तः अतः लंडने अनेकाः सभाः आयोजिताः।

लाला-लजपतरायेन सह भाई-परमानन्दस्य वैयक्तिकः सम्बन्धः आसीत्। भाई-परमानन्दः यदा विदेश-यात्रायाम् आसीत् तदा लालाजी भारतस्य स्थितेः विषये समये समये सूचयति स्म। लाला-लजपतरायस्य उपरि आङ्ग्लशासकानाम् अनेन व्यवहारेण भाई-परमानन्दः अत्यन्तं दुःखितः जातः। व्यथां वाचां दातुं लंडने जातासु सभासु कासुचित् सभासु भाई-परमानन्दः अपि व्याख्यानानि दत्तवान्।

एतादृश्यां विकट-परिस्थित्यां भाई-परमानन्दस्य 'इंडिया हाउस्'मध्ये निवासः न योग्यः तथा च श्रीश्यामजीकृष्णवर्मणा लाला-हरदयाल-सदृशैः सह सङ्गः न उचितः तादृशाः सङ्केताः सम्प्राप्ताः।

किन्तु येषां मनोबलं दृढं भवति ते तु कीदृशाः अपि लोभजनकाः संयोगाः भवन्तु तेभ्यः अणिशुद्धाः सन्तः बहिः निर्गच्छन्ति । भाई-परमानन्दस्य पार्श्वे जलकमलवत् स्थितेः कला हस्तगता आसीत् । राजकीय-गतिविधिभ्यः अलिप्तं स्थेयम् इत्यस्य आशयं स्पष्टीकुर्वन् भाई-परमानन्दः कथयति स्म यत् - "राजद्वारि-आन्दोलनेषु प्रपतनस्य न मम कोऽपि अधिकारः यतो हि अहं तु मम समग्रं जीवनम् आर्यसमाजाय अर्पितवान् अस्मि । राजद्वारि-आन्दोलनेषु निपतामि चेत् आर्यसमाजाय पूर्णतया निरुपयोगी भवेयम् इति तु निश्चितमेव ।"

देवस्वरूपः सानुक्रोश-स्वभावयुतः भाईजी आङ्ग्लशासकान् पूर्णतया न जानाति स्म । आङ्ग्लशासकानां दृष्टिपथम् आगतेन जनेन सह वार्तालापः करणीयः इत्यपि हिन्दुस्ताने एकः महनीयः अपराधः गण्यते स्म ।

श्रीश्यामजीकृष्णवर्मणा लाला-हरदयालेन च सह भाई-परमानन्दस्य आत्मीयता आङ्ग्लशासकानां मनसि अक्षिदोषमिव शूलयति स्म ।

एतादृशः कण्टकसदृशः भाई-परमानन्दः इतिहास-संशोधनं समाप्य भारतं गन्तुं लंडनतः प्रतिनिवृत्तः तदा आङ्ग्लशासकानां 'विद्रोहिजनकोशे' भाई-परमानन्दस्य नाम,प्रवृत्तिः व्यक्तित्वं च उट्टङ्कितम् अभवत् ।

ooooo

५

आङ्ग्लशासकस्य खेटः

भारतभूमौ चरणं स्थापयन् एव भाई–परमानन्दः लाहोरस्थे स्वमहाविद्यालये पाठनकार्ये सक्रियः जातः। सः आयुर्वेदविभागं विश्वविद्यालयतः पृथक्कृत्य मातृभाषायां हिन्दीभाषायां पाठयितुम् इच्छति स्म।

१९०८मध्ये भाई–परमानन्दः ब्रह्मदेशं गतः। आर्यसमाजस्य प्रचारेण सह महाविद्यालयस्य विकासाय प्रायः नवसहस्रं रूप्यकाणां दानम् एकत्रीकृत्य प्रतिनिवृत्तः।

ब्रह्मदेशस्य यात्रातः प्रतिनिवर्तनानन्तरं भाई–परमानन्दस्य जीवने नूतनः चक्रवातः समायातः। लाहोरस्थ–निवासस्थाने चौर्यम् अभवत्। चोरितेषु वस्तुषु तेन सार्धैकवर्षाणां महता प्रयत्नेन इंग्लैण्डदेशे उषित्वा, क्षुत्पिपासे सोढ्वा एकत्रीकृता भारतस्य इतिहासविषयिकी या सामग्री आसीत् सापि चौर्यं गता।

लेखनसामग्रेः चौर्यस्य अविस्मरणीयः आघातः आसीत् तथापि १९०९वर्षस्य ग्रीष्मकालस्य अवकाशेषु भाई–परमानन्दः दक्षिण–भारते बेंग्लोर, चेन्नई, सेलम्, मछलीपट्टनम्, राजमन्दरी, हैद्राबाद–आदिनगरेषु आर्यसमाजविषयकानि व्याख्यानानि दत्तवान्।

ब्रह्मदेशस्य प्रवाससमये चौर्यस्य अनुभव–कारणेन दक्षिणभारतस्य प्रवाससमये भाई–परमानन्दः स्वगृहं गृहस्वामिने प्रतिदत्तवान्।

अनन्तरम् इदं गृहं द्वौ क्रान्तिवीरौ सरदार–अजितसिंहः किशनसिंहः च भाटकेन क्रीतवन्तौ। सरदार–अजितसिंहम् आङ्ग्लसर्वकारः निबद्धुम् उद्यमं करोति इति सूचनां प्राप्य सः कराचीमार्गेण ईरानदेशं पलायितः। सरदार–किशनसिंहः अपि गृहं रिक्तं कृत्वा प्रतिदत्तवान्।

विद्रोहिभ्यां भाटकेन क्रीत्वा रिक्ते कृते गेहे भाई–परमानन्दः दक्षिणभारतयात्रातः प्रत्यागत्य निवासं कृतवान् अतः रक्षापुरुषाः उत्तमम् अवसरं प्राप्तवन्तः।

छलकुशला: आङ्ग्ल-रक्षापुरुषा: गृहस्वामित: तादृशं प्रतिज्ञापत्रं लेखितवन्त: यत् अधुना अपि गृहं सरदार-अजितसिंहस्य हस्ते भाटकरूपेण विद्यते। सरदार-अजितसिंहस्य गृहे संशोधनाय रक्षापुरुषा: समर्था:, अधिकारिण: च आसन् एव।

भाई-परमानन्द: एकदा महाविद्यालयं गत: आसीत् तदा रक्षापुरुषा: आपातं कृत्वा पत्राणि उत्पाटितवन्त:। लंडने स्वमित्राणां यानि पत्राणि प्राप्तानि तानि रक्षापुरुषा: स्वायत्तीकृतवन्त:।

'महमदस्य शिरस्त्रं महमदस्य मस्तके कथं पुन: स्थापनीय'मिति ऐन्द्रजालिकम् आङ्ग्ल-रक्षापुरुषा: उत्तमतया जानन्ति स्म। भाई-परमानन्दस्य उत्पीठिकाया: कोशत: सरदार-अजितसिंहस्य सङ्केतयुक्तानि पत्राणि निष्कासितानि !!!

भाई-परमानन्द: प्रथमतया एवम् अनुमानं कृतवान् यत् यदा मां प्रक्ष्यन्ति तदा सर्वस्य वृत्तान्तस्य सन्तोषकारकम् उत्तरं दत्त्वा मम निर्दोषत्वं सिद्धं करिष्यामि इति। किन्तु यदा ऐन्द्रजालिक-रूपाणाम् आङ्ग्ल-रक्षापुरुषाणां हस्तत: विविधानि वस्तूनि निर्गच्छन्ति दृष्ट्वा स: किंकर्तव्यविमूढ: जात:।

'हिंन्दना इतिहास'इति विषयस्य पत्राणां अपहरणान्तरं भाई-परमानन्द: स्वस्मरणशक्त्यअनुसारं यत् किमपि लिखितवान् तदपि आङ्ग्ल-रक्षापुरुषै: अपहृतम्।

एकमासं यावत् भाई-परमानन्द: स्वग्रामे उषित्वा यदा लाहोर-रेलस्थानके रेलयानात् अवतरति स्म तदानीमेव अधीक्षकेण तस्योपरि सेनाकीय-न्यायस्य धारा-११०अनुसारं कार्यं हस्ते धृतम्।

एकं विशेष-न्यायाधीशं पुरत: एवमेव मासत्रयं यावत् विवाद: अचलत्। आर्यसमाजस्य प्रचाराय भाई-परमानन्द: हिन्दुस्तानस्य विभिन्न-प्रान्तेषु यान् प्रवासान् कृतवान् तेषाम् उद्देश: न अन्य: किन्तु सर्वकारं प्रति विद्रोहं विस्तारयितुम् एव आसन् इति सर्वकारस्य वाक्कील: न्यायालयं प्रति स्पष्टीकर्तुं प्रयतितवान्।

अन्तत: वर्षत्रयं सुचारुव्यवहारेण प्रतिभावन(जामिन)माध्यमेन अथवा वर्षत्रयं यावत् कठोर-कारावासस्य दण्ड: इति न्यायालयेन वैकल्पिक: निर्णय: सूचित:।

भाई-परमानन्दः प्रतिभावनद्वारा मुक्तिं न इच्छति स्म कारणं तस्य मनसि इदं निश्चितं जातम् आसीत् यत् हिन्दुस्ताने न कोऽपि स्वतन्त्रः वा स्पष्ट-वक्ता मनुष्यः सुखेन भ्रमणं कर्तुं निवासं वा कर्तुं शक्तः। किन्तु मित्राणाम् आग्रहेण सः स्वविचारं शिथिलं कृत्वा प्रतिभावनद्वारा मुक्तिं प्राप्तवान्।

'विश्वविजय का स्वप्न धारकर कठिन परिश्रम करना है,

समता ममता दया धर्म का भाव जगत में भरना है,

मन में दृढ सङ्कल्प लिये फिर अमरपुत्र ललकार उठा।'

एतान् शब्दान् हृदये उट्टङ्कितान् कृत्वा भाई-परमानन्दः जीवनस्य अग्रिमे सोपाने अग्रेसरः अभवत्।

ooooo

६

अमेरिकदेशस्य यात्रा

आङ्ग्ल-शासनस्य क्रूर-बन्धनात् प्रतिभावनमार्गेण मुक्त्यनन्तरं भाई-परमानन्दः स्वग्रामे निवासं कृतवान्। कृतिशीलाः मनुजाः दीर्घकालं यावत् निष्क्रियाः कथं निवसेयुः ? निष्क्रियत्ववशात् भाईवर्यस्य मनः उदासीनं भवति स्म।

आर्यसमाजः वा अन्या सार्वजनिकी प्रवृत्तिः तस्य कृते कठिना आसीत् यतो हि एतादृशं किमपि कार्यं सर्वकार-दृष्ट्या तु शङ्का-सभरमेव आसीत्। ग्रामजनाः अपि तथा भयाक्रान्ताः आसन् येन ते भाई-परमानन्देन सह मेलने वा वार्तालापे अपि सङ्कोचम् अनुभवन्ति स्म।

स्वदेशी-विचारः अधुनापि प्रभाववान् आसीत्। अतः भाई-परमानन्दः औद्योगिक-क्षेत्रे स्वात्मानम् उपयोगिनं कर्तुं चिन्तितवान्। अनेकेषु उद्योगेषु औषधक्षेत्रे उद्योगः करणीयः इति निश्चयः कृतः। तदानीम् अमेरिकादेशे एतद्विषयकं शिक्षणं सुचारुतया भवति स्म। किं तर्हि महता चिन्तनेन ! चिन्तनं क्रियान्वितं कर्तुं भाईजी अमेरिकायात्रायाः निश्चयं कृतवान्।

एकेन फ्रान्सदेशीय-जलपोतेन मुम्बईतः मार्सेल्जनगरं ततः च पेरिसं प्राप्तवान्। पेरिसे लाला-हरदयालः राजकीय-गतिविधिभ्यः उदासीनः भूत्वा तपः-साधनां करोति इति भाईजी समाचारं प्राप्तवान्।

एकेन डच्-देशीय-'एम्स्टर्डम्'नामक-जलपोतेन न्युयोर्क्देशं प्रति प्रस्थानं कृतवान्। सप्तदिनानां यात्रायां पोतस्थानां विभिन्न-देशीयानां स्त्री-पुरुष-बालकानां मनोवृत्तीनाम् अभ्यासाय अनुपमम् अवसरं भाई-परमानन्दः प्राप्तवान्। सप्तमदिने एकस्यां स्थानिक-धर्मशालायां रात्रिवासं कृत्वा साक्षात् फिलाडेल्फियानगरं गतवान्। अक्तूबरमासः प्रचलन् आसीत्, औषधक्षेत्रीयः अभ्यासक्रमः मासद्वयात् पूर्वम् आरब्धः आसीत् अतः पुनः न्युयोर्कं प्रत्यागत्य प्रवेशं प्राप्तुं प्रयत्नं कृतवान्। किन्तु तत्र अपि सत्रारम्भः जातः अतः निष्फलता प्राप्ता।

कोलम्बिया विश्वविद्यालयस्य देवलस्य धर्मगुरुणा सह भाईजीवर्यस्य मेलनं जातम्। भाई-परमानन्दं भोजनाय निमन्त्रणं दत्त्वा औषधीय-आपणिकान् उद्दिश्य सम्मानपत्रं लिखित्वा वर्षं यावत् उद्योगं दातुं धर्मगुरुः विनतिं कृतवान्। भाई-परमानन्दस्य मनसि अयं प्रश्नः उत्पन्नः यत् धर्मगुरुः किमर्थं तस्य कृते इत्थं चिन्तां करोति ? स्वार्थं विहाय सहायतावृत्तिः हिन्दुमतं विहाय अन्यस्मिन् मते किं सम्भाविता अस्ति खलु ? भाईजी ख्रिस्त-धर्मगुरु-द्वारा सहायतां प्राप्य ख्रिस्तमतस्य अनुयायी भवेत् इति दृष्टिपथे आगतम्। भाई-परमानन्दस्य हृदयं धर्मपरिवर्तनं स्वीकर्तुं शक्नोति खलु ? न इति मनसः उत्तरं ज्ञात्वा भाईजी ख्रिस्त-धर्मगुरोः आभारं व्यक्तं कृत्वा ब्रिटिश्-गुआनाप्रान्तं प्रति गमनाय चिन्तितवान्।

अमेरिकी-समाजस्य विविधानां परिप्रेक्षाणां तलस्पर्शि-अभ्यासं कुर्वन् भाई-परमानन्दः इदं ज्ञातवान् यत् तत्र रङ्गभेदस्य वृत्तिः व्यापक-प्रमाणेन प्रवर्तिता अस्ति इति। स्वीये इंग्लैण्ड-यात्रासमये भाटकेन गृहप्राप्तिः अतीव सरला आसीत्। तदपेक्षायाम् अमेरिकी-गौरवर्णाः जनाः अश्वेत-जनानां विषये पुनः-पुनः साशङ्काः भवन्ति स्म। खाद्य-पेयापणेषु अपि रङ्गभेदस्य वृत्तिः दृष्टिगोचरा भवति स्म।

एकम् अपरं पक्षमपि भाई-परमानन्दः दृष्टवान्। अमेरिकी-स्त्री-पुरुषेषु एकः तादृशः वर्गः आसीत् यः ब्रह्मवादेन(थियोसोफी)स्वामी-विवेकानन्दानन्तरं तस्य विचारान् कार्याणि च अग्रे वर्धयितुं योजनापुरस्सरं यदि कार्यं जातं स्यात् अमेरिकायाम् एकः बृहद् शक्तियुक्तः वर्गः उद्भूतः भवेत् किन्तु वास्तविकः अनुभवः कीदृशः आसीत् ? भाईजी वेदान्त-सोसाईटी-संस्थायाः साक्षात्काराय गतवान् तदा अनुभूतं यत् सञ्चालकाः भारतीयैः सह मेलितुं न इच्छन्ति स्म।

भाई-परमानन्दः यदा आफ्रिकदेशं गतवान् तदा समाचारं प्राप्तवान् यत् भारतीय-कर्मकराणां महती संख्या दक्षिण-अमेरिकादेशं प्रति नीयमाना अस्ति। जलपोतस्य चिटिकां क्रीत्वा ब्रिटीश्-गुआनादेशं गत्वा औषधविज्ञानस्य अभ्यासे प्रवेश-प्राप्तौ विलम्बितः भाई-परमानन्दः भारतीयसमुदायेन मेलने समययापनं कर्तुं निर्गतः। 'साधु तो चलता भला' इत्येषा उक्तिः भाई-परमानन्दस्य कृते कीदृशी यथार्था इव भाति ?

षष्ठ दिने जलपोतं मार्टिनीक-द्वीपस्य पोर्ट द फ्रान्सनगरम् एकं दिनम् विश्रामस्य कृते अतिष्ठत् । भाईजी जानाति स्म यत् लाला-हरदयालः अस्मिन्नगरे तपःसाधनायां जीवनं यापयति । भाईजी लाला-हरदयालन मेलितुम् इच्छति स्म । नगरं गत्वा निवासस्य सङ्केतं प्राप्तुं प्रयासम् अकरोत् । केषांचित् होराणां प्रयत्नानन्तरं प्राथमिकम् आंग्लं जानन् एकस्य हबसी-भारवाहकस्य बालकः सम्प्राप्तः । अयं बालकः परमानन्दं एकस्याः महिलायाः समीपं नीतवान् । इयं महिला एकाकिनी निवसति स्म अतः स्वगृहस्य उपरितनं भागं लाला-हरदयालाय भाटकेन दत्तवती आसीत् ।

समीपस्थायां पर्वतमालायां तपः कर्तुं गतः आसीत् अतः लालाजी गृहे न आसीत् । किन्तु सः हबसीबालः तपःस्थलं जानाति स्म अतः लाला-हरदयालम् आहूय आनयत् । गृहं प्रति आगमनसमये लाला-हरदयालस्य मनसि इयं भीतिः आसीत् यत् तेन सह मेलितुं कः आगतः स्यात् ? किन्तु भाईजीं दृष्ट्वा एव मनोभावाः परिवर्तिताः । एतावद्दूरवर्ति-स्थाने कस्यचिद् भारतीयस्य आगमनं भवेत् तदपि कस्यचिद् मित्रस्य आगमनं भवेत् ! इत्थं विचिन्त्य सः भावविभोरः सञ्जातः । लाला-हरदयालः जलपोततः भाईजी-वर्यस्य सम्भारम् आनीय तम् रोधितवान् । अपरं जलपोतम् एकमासानन्तरम् आगच्छति स्म अतः मासं यावत् भाई-परमानन्दस्य तत्रैव निवासः सुनिश्चितः जातः !

तापसकल्पं जीवनं यापयन् लाला-हरदयालः स्वमनसः भावान् भाई-परमानन्दस्य समीपं प्रकटयन् कथितवान्-"अहं विश्वस्मिन् बुद्धस्य इव अपरं नूतनं धर्मं स्थापयितुम् इच्छामि इति । अत एव अनेन प्रकारेण जीवनं यापयन् आत्मानं सन्नद्धं करोमि ।"

भाई-परमानन्दः धर्मसम्बन्धिषु विचारेषु अत्यन्तं स्पष्टः आसीत् । हिन्दुधर्मस्य मत-मतान्तरैः सामान्यः मनुष्यः वंचितः भवति इति तस्य मतम् आसीत् । लाला-हरदयालस्य पुरस्तात् स्वमनोभावं प्रकटयन् भाई-परमानन्दः कथितवान् यत् - स्वामि-विवेकानन्द-द्वारा यत् उत्तमं कार्यम् अभवत् तस्य प्रभावः गच्छता कालेन क्षीणतां भवति अतः अमेरिकां गत्वा आर्यसभ्यतायाः प्रचार-प्रसारकार्यं लाला-हरदयालः करोतु इति तस्य मतम् ।

उभयोः मध्ये दीर्घवार्तालापः, मतमतान्तरविषये गहनं चिन्तनं मननं च अभवत् अन्ततः लाला-हरदयालः हार्वर्ड्-विश्वविद्यालये एक-द्विवर्षाभ्यन्तरं केन्द्रं स्थापयेत् इति निश्चितम् अभवत् ।

भाई-परमानन्दः जलपोतद्वारा जोर्ज्-टाउन-नगरं प्रति निर्गतः । न किमपि परिचितं नाम-सङ्केत-स्थानं वा कुत्र गन्तव्यम् ? पोतागारात् निर्गच्छन् हि मार्गस्थो ट्रामयानं दृष्टवान् किन्तु गन्तव्यं ज्ञातं भवेत् चेत् ट्रामयानस्य उपयोगः कर्तुं शक्येत !!

एकं हबसी-ख्रिस्तधर्मगुरुं भारतीयजनाः कुत्र निवसन्ति इति विषयकं भाईजी पृष्टवान् तदा पादरीवर्यः तत्र यावत् भाई-परमानन्दस्य प्रापणस्य दायित्वं स्वीकृतवान् तत्र एकः पूर्वसमयः आसीत् यत् ट्रामयानस्य भाटकं भाईजी दद्यात् !

ग्रामतः एक-द्विमाईल्-बहिः ट्रामयानतः अवतीर्य किञ्चित् पदयात्रां कृत्वा अपक्व गृहाणाम् आवलिमध्ये धर्मगुरुः भाईजीं नीतवान् । गृहाणां मध्ये जलस्रोतः आसीत् । जलस्रोतसम् उभयतः गृहाणि उटजानि च आसन् । एतेषां सर्वेषां मध्ये एकं लघुमन्दिरम् आसीत् । धर्मगुरुः भाईजीं मन्दिरं यावत् आनयत् । वंशपरंपरातः परिश्रमं कर्तुं चिरनिवसिताः भारतीयाः यत्र यत्र निवासं कृतवन्तः तत्र तत्र स्वीयम् आराध्यदेव-देवीः न विस्मृतवान् इति विशेषता भाई-परमानन्दस्य मनसि अतिष्ठत् ।

एकस्मिन् महाखण्डस्य अर्धभागे मन्दिरम् आसीत् । अपरे अर्धभागे आसनम् आस्तीर्णम् असीत् । भाईजी स्वसामग्रीम् आसनसमीपं स्थापितवान् । रात्रिः जाता आसीत् । दीर्घकेशयुक्तः एकः भारतीयः अर्चकः आगत्य भाईजीं पृष्टवान् "कुतः आगतः भवान् ? कः अस्ति ?" भाईजी उत्तरं दत्तवान् "ब्राह्मणः अस्मि । देशतः आगतः ।"

"किं भारवाहकरूपेण चयनं प्राप्य आगतः ? किं जलपोतम् आगतम् ?"

"नहि, अहं तु एवमेव समायातः । भाईजी प्रत्युत्तरं दत्तवान् ।"

अर्चकः उक्तवान् "विनाकारणं तु अद्यावधि न कोऽपि देशतः अत्र समायातः ।"

भाई–परमानन्दः मन्दिरे निवासं कुर्यात् इति अर्चकस्य इच्छा न आसीत्। भाईजी केवलं क्षुधितोदरः सुप्तः। प्रातः आङ्ग्लटोपिकाम् उरुकं च निष्कास्य धौतं शिरोवेष्टनं च धारयित्वा भाईजी समीपस्थैः एक–द्वि–निर्धनजनैः सह वार्तालापे प्रवृत्तः। एकः किञ्चित्–शिक्षितः युवकः तस्य कृते ओदनम् आनीतवान्। चतुष्पञ्च–दिनानि यावत् कटस्य उपरि शयनम्, सूपोदनद्वारा च उदरपूर्तेः क्रमः प्राचलत्।

तत्र अधिकाः जनाः परिश्रमं कुर्वन्ति स्म। प्रातःकाले कार्यं कर्तुं निर्गच्छन्ति सायं च प्रत्यागच्छन्ति स्म। अनन्तरं भाईजीवर्येण सह सत्सङ्गः चलति स्म। वार्तालाप–अभ्यन्तरं भाईजी भारतीयसमाजस्य विचित्राम् अवस्थां ध्याने नीतवान् तद्यथा – ये पठितविद्याः प्रतिष्ठिताः भारतीयाः आसन् –येषु चिकित्सकाः, व्यापारिजनाः इत्यादयः अपि आसन् ते सर्वे अपि ख्रिस्त–धर्मानुयायिनः अभवन्।

एकं विशालम् आपणं धारयतः हिन्दुजनस्य समीपं गतवन्तः। आपणस्वामिनं भाईजी निवेदितवान् यत्–सः एकं प्रवचनं दातुम् इच्छति इति। तस्य ख्रिस्तधर्मानुयायिनः जन्म तत्रैव अभवत् अतः सः न कमपि प्रवचनं कुर्वन्तं भारतीयं दृष्टवान् न च श्रुतवान् अपि।

आपणिकः भाई–परमानन्दम् एकस्य भारतीय–ख्रिस्त–चिकित्सकस्य पुरतः नीतवान्। उभयोः परिचयः जातः। भाईजीतः प्रभावितः चिकित्सकः प्रायः विंशतिः डोलर्–परिमितं व्ययं कृत्वा नगरसभाखण्डं भाटकेन क्रीत्वा वृत्तपत्रेषु विज्ञापनम् अपि दत्तवान्।

सुदूरवर्ति–ग्रामतः विशालसंख्यायां भारतीयजनाः व्याख्यानं श्रोतुम् आगताः। केचन श्वेतजनाः अपि उपस्थिताः। व्याख्यानानन्तरं भाई–परमानन्दस्य कृते आदरः व्यापकः जातः। अनेक–हिन्दु–कुटुम्बेषु भाईवर्यस्य गमनं जातम्। ख्रिस्तजनानां मध्ये कोलाहलः व्याप्तः।

भारतवासिजनानाम् आवास–निवसनादिकं समीपतः दृष्ट्वा तदध्ययनस्य लाभं भाई–परमानन्दः अनयत्। आफ्रिकदेशे भारतीयानां कृते राजकीयाः समस्याः आसन् किन्तु व्यापारक्षेत्रे साफल्यं प्राप्तम् आसीत् अतः भारतवासिनः स्वधर्मं प्रति

आस्थावन्तः आसन् । ब्रिटिश्-गुआनामध्ये राजकीय-समस्याः अल्पाः आसन् किन्तु पठितविद्याः भारतीयाः ख्रिस्त-धर्मिणः सञ्जाताः । लघुबालकानां कृते प्राथमिक-शिक्षाव्यवस्थायाः अभावः भाई-परमानन्दस्य ध्यानपथे आयातः ।

महत्तया प्राथमिक-शालाः ईसाई-पादरी-देवलभवनेषु चालयन्ति स्म । अतः व्यापकं प्रवासं, प्रयत्नं च कृत्वा भाईजी प्रायः एकसहस्र-डोलरपरिमितं दानम् एकत्रीकृत्य एकां हिन्दुशालाम् आरब्धवान् ।

स्थानिक-भारतीयाः इच्छन्ति स्म यत् भाई-परमानन्दः तत्रैव निवासं करोतु इति, किन्तु लाला-हरदयालस्य पत्रं भाईजीवर्यम् उद्दिश्य आगतम् । केलिफोर्निया-विश्वविद्यालये विनाशुल्कं प्रवेशः प्राप्तः भवति इति समाचारः तस्मिन् पत्रे आसीत् । दिनत्रयं प्रवासं कृत्वा व्यख्यानानि च दत्त्वा भाई-परमानन्दः नूतनं सोपानं प्रति अग्रेसरः अभवत् ।

००००

७

विद्यार्थी जातः

ब्रिटीश्-गुआनानिवासि-भारतीयजनान् स्वबलेन धर्मः-संस्कृति-शिक्षादीनां पोषणाय कार्यरताः भवन्तु इति मार्गदर्शनं दत्त्वा औषधीये-अभ्यासे भाई-परमानन्दः प्रवेशं प्राप्तवान् ।

सान्-फ्रान्सिस्कोनगरं प्रति गमनसमये मार्गमध्ये ट्रामयाने बहु जनसम्मर्दः आसीत्। एकः सज्जनः स्वस्थानात् उत्थाय भाईजीं स्वस्थानं दातुम् उद्युक्तः जातः। सः सज्जनः पृष्टवान् 'किं भवान् सन्यासी अस्ति ?' तदा नम्रेण सत्यवादिना भाई-परमानन्देन उत्तरं दत्तम् -"अहं धर्मोपदेशकः तु अस्मि, किन्तु सन्यासी न अस्मि ।" सः सज्जनः स्वपरिचयपत्रं दत्तवान्। एकेन चिकित्सकेन सह अनया रीत्या भाईजी-वर्यस्य सम्बन्धः प्रतिष्ठितः ।

औषधीयेत् अभ्यासेन सह भाई-परमानन्दः अमेरिकदेशीय-जीवनशैल्याः निरीक्षणस्य अनुपमम् अवसरं प्राप्तवान् । केलिफोर्निया-राज्यं समशीतोष्ण-वातावरणयुतम् शैक्षणिक-आर्थिकदृष्ट्या च अमेरिक-देशस्य महत्त्वपूर्णं राज्यम् आसीत् । सर्वेषां बालकानां कृते प्राथमिक-शिक्षातः आरभ्य विश्वविद्यालयपर्यन्तं निःशुल्क-शिक्षायाः व्यवस्था आसीत् इत्येतत् दृष्ट्वा भाईजी प्रभावितः जातः ।

विद्यार्थिजीवनस्य अपरा परम्परा अपि भाई-परमानन्दं प्रभावितं कृतवती सा आसीत् - सप्ताहे द्वित्रिहोरापर्यन्तं द्वि-त्रिगृहेषु, आपणेषु उद्योगालयेषु वा कार्यं कृत्वा विश्वविद्यालयस्य छात्राः स्वनिर्वाहाय अर्थोपार्जनं कुर्वन्ति स्म ।

पश्चिम-अमेरिकदेशस्य केलिफोर्निया-राज्यसमेतं सर्वेषु राज्येषु समानतायाः व्यवहारेण भाई-परमानन्दः सुखानुभूतिं करोति स्म । रेलयानेषु समान-वर्गस्य उपवेशन-व्यवस्था आसीत् । महाविद्यालयस्य किंकरस्य मासिकं वेतनं प्रायः प्राध्यापकस्य वेतनसमानमेव भवति स्म । तत्र भेदः केवलं सः आसीत् यत् प्राध्यापकाः तेषां शैक्षणिक-वैशिष्ट्यवशात् अधिकं सम्मानं प्राप्नुवन्ति स्म ।

एकः भारतीय-परिश्रमकरः रेलयाने कार्यं कुर्वाणः रेलयानस्य अधः आगत्य मृत्युं प्राप्तवान् । तस्य कुटुम्बजनाः रेलशासनं प्रति न्यायालये अभियोगं कृतवन्तः । न्यायालये अस्य अभियोगस्य सन्दर्भे अनुवादकरूपेण भाई-परमानन्दः कार्यं प्राप्तवान् ।

अष्ट/दशसहस्त्र-संख्यायां भारतीयजनाः अमेरिकादशे निवासं कृतवन्तः । भारते सेनायां रक्षापुरुषक्षेत्रे वा सेवां प्राप्य चीनदेशं गतवन्तः ततः संयोगतः अमेरिकादेशं प्राप्तवन्तः । अमेरिकायां मुख्यतः ग्राम्यविस्तारेषु कृषिपरिश्रमकर-रूपेण कार्याणि प्राप्य क्रमशः पत्राणि लिखित्वा स्वसम्बन्धिजनान् अपि अमेरिकाम् आह्वयन्ति स्म ।

भारततः ये छात्राः अभ्यासार्थम् अमेरिकां गच्छन्ति स्म ते अपि भारतीय-परिश्रमकरैः सह लघु-बृहत्कार्याणि प्राप्य स्वनिर्वाहं कुर्वन्ति स्म । अवकाशदिनेषु भाई-परमानन्दः अपि पुष्पचयनस्य कार्ये व्यापृतः जातः । सार्धद्वि-डोलरपरिमितं पारिश्रमिकं प्रतिदिनं प्राप्नोतिस्म ! सः एकमासं यावत् इदं कार्यं कृतवान् ।

प्रथमदिने ट्रामयाने प्राप्तेन चिकित्सक-सज्जनेन सह आत्मीयतावर्धनं जातम् अतः सः चिकित्सकः स्वगृहे परिचितान् स्त्री-पुरुषान् आहूय भाई-परमानन्देन सह धार्मिक-वार्तालापस्य आयोजनं कृतवान् । तस्य चिकित्सकस्य मित्र-चिकित्सकस्य औषधालयः अपि आसीत् । तस्य आपणे सः भाईजीवर्याय कार्यं दत्तवान् । आपणे एव एकस्मिन् प्रकोष्ठे भाई-परमानन्दः निवसति स्म । भोजनादतिरीक्तं उपरान्तं व्ययार्थं दश-डोलरपरिमितं धनं प्राप्तं भवति स्म ।

यदा भाईजी सान्-फ्रान्सिस्कोमध्ये आसीत् तदा लाला-हरदयालः होनोलूलूतः तत्र आगतः । भाई-परमानन्दस्य परिचितेन चिकित्सक-मित्र-द्वारा सभाखण्डं भाटकेन क्रीत्वा लाला-हरदयालः हिन्दु-दर्शनशास्त्रविषयकं व्याख्यानम् आयोजितवान् । तस्य व्याख्यानेन वक्तृत्वशक्त्या, योग्यता-कारणेन च तस्य ख्यातिः विस्तृता जाता । समीपस्थ-स्टेनफोर्ड्-विश्वविद्यालयस्य अध्यक्षतः लाला-हरदयालस्य आनुकूल्यं जातम् । सः मानदां सेवां दास्यति इति लाला-हरदयालः यदा ज्ञापितवान् तदा सः संस्कृतस्य हिन्दु-दर्शनशास्त्रस्य प्राध्यापकरूपेण नियुक्तिं प्राप्तवान् ।

स्वयोग्यता–शालीनता–त्यागादिगुणानां शक्त्या लाला–हरदयालः सन्मानं प्राप्तवान् तथा च वृत्तपत्रेषु हिन्दु–ऋषिरूपेण तस्य उल्लेखः भवति स्म ।

स्वभावतः लाला–हरदयालः कदापि मध्यमावस्थायां स्थातुं न शक्नोति स्म । सर्वदा 'कार्यं वा साधयेयम् देहं वा पातयेयम्' इति निर्णायकीम् अन्तमवादिनीं स्थितिम् अवलम्ब्य तिष्ठति स्म । इदं तस्य लाक्षणिकत्वम् आसीत् । अध्यापनकार्यं कुर्वन् तस्य मनसि समाजवादः वा साम्यवादः आरूढः । साम्यवादतः सः अराजकतावादं यावत् प्राप्तवान् ।

सः विश्वविद्यालये अराजकतावादस्य मुक्ततया प्रचारम् आरब्धवान् । भाई–परमानन्दः लाला–हरदयालः च घनिष्ठसुहृदौ आस्ताम् तथापि द्वयोः मध्ये वैचारिक–मतभेदाः तीव्रतराः आसन् । प्रोफेसर–रूपं कार्यं त्यक्त्वा लालाजी सान्–फ्रान्सिस्कोराज्यं प्रति गतः । भारतीय–छात्रैः सह लालाजी आत्मीयतां वर्धितवान् । तदनन्तरं शिक्खबान्धवैः सह मेलापं वर्धितवान् । मित्रता–परीक्षायाः अनिच्छुकः भाई–परमानन्दः लाला–हरदयालस्य कार्येषु रुचिं निवारितवान्।

००००

८

'गद्दर'- आन्दोलनम्

मई-१९१३मध्ये भाई-परमानन्दः विश्वविद्यालयतः पदवीं प्राप्तवान्। तदनु सः भारतं प्रत्यावर्तनविषये चिन्तयति स्म। लाला-हरदयालस्य आग्रहवशात् तेन सह पोर्टलेण्डं गतः। पोर्टलेण्डस्थ भारतवासिनः देशाय कथम् उपयोगिनः भवितुं शक्नुवन्ति इति मार्गदर्शनम् इच्छन्ति स्म।

भाई-परमानन्दः सूचितवान् यत् द्वि-त्रिविश्वविद्यालयानां समीपवर्ति-भवनं क्रीत्वा भारततः अभ्यासाय आगच्छतां छात्राणां निःशुल्का निवास-व्यवस्था चिन्तनीया। अपरमपि प्रतिवर्षं निश्चितसंख्यायां छात्राः अमेरिकादेशं शिक्षार्थम् आगच्छेयुः इति प्रायोजनं करणीयम्।

लाला-हरदयालः आग्रहं कृतवान् यत् एकः मुद्रणालयः एकं वृत्तपत्रं च आरब्धव्यम्। भाईजी-लालाजीमध्ये मतभेदः अस्ति इति दृष्ट्वा तथा च भारतं प्रत्यागन्तव्यम् आसीत् अतः भाईजी पोर्टलेण्डतः न्युयोर्कं गत्वा इंग्लैण्डं गतः।

अमेरिकादेशस्य प्रवाससमये भाई-परमानन्दः 'तारीख-ए-हिन्द' नामकम् एकं पुस्तकं लिखितवान्। लाला-हरदयालेन सह प्रवासः, प्रवचनानि तथा च पुस्तकलेखनसमन्विताः गतिविधयः ब्रिटिश्-शासकानां तीक्ष्णदृष्टिपथात् न गुप्ताः आसन्। लाला-हरदयालस्य विचारतः भाई-परमानन्दस्य विचाराः भूमेः द्यौरिवभिन्नाः आसन् तथापि इंग्लेण्डं प्राप्ते एव परमानन्दे तस्य पृष्ठे गुप्तचराः लग्नाः।

योगानुयोगं १९१३वर्षे एस्ट्रोरियामध्ये एकस्यां सभायां भारतीय-प्रवासिनः 'गद्दर'आन्दोलनस्य आरम्भं कृतवन्तः।

'गद्दर्'-अर्थात् विद्रोहः ! सान्-फ्रान्सिस्कोमध्ये मुख्यालयं स्थापयित्वा सोहनसिंह-भखाना-अध्यक्षतायां भारतीय-स्वातन्त्र्य-सङ्ग्रामे भारतात् बहिः अत्यन्तं महत्त्वपूर्णां भूमिकां निवहमानम् 'गद्दर'आन्दोलनं सक्रियं जातम्।

'युगान्तर-आश्रम'-नामक-संस्थायाः अन्तर्गतं विदेशेषु स्थितानां भारतीयानां

मनसि राष्ट्रभक्तिजागरणस्य कार्यम् आरब्धम् ।

'गद्दर'आन्दोलनेन आङ्ग्लशासनं कियद् भयभीतं जातं स्यात् तत् तु अनेन ज्ञातुं शक्यते यत् १९१७मध्ये सान्-फ्रान्सिस्कोराज्यस्य न्यायालये 'गद्दरवादिनाम्' उपरि यः अभियोगः चलति स्म तदर्थं ब्रिटिश्-सर्वकारेण सार्धद्विमिलियन्-डोलर्परिमितः व्ययः कृतः आसीत् !

१९१९तमे वर्षे लाहोरमध्ये ब्रिटिश्-रक्षाविभागद्वारा न्यायालये 'Account of Gaadar Conspiracy'नामकं वृत्तविवरणं प्रस्तुतम् । अस्मिन् विवरणे 'गद्दर'आन्दोलनस्य हेतुः तस्य गतिविधिः इत्यादिकस्योपरि चर्चितमासीत् ।

भारतमुक्तिः, ब्रिटिश्-शासकस्य निष्क्रमणं, समानाधिकारयुक्तं स्वतन्त्रं भारतराष्ट्रं स्थापनीयम् इति तस्य आन्दोलनस्य मुख्यमुद्देश्यम् आसीत् ।

प्रवासिभारतीयेषु देशभक्तिम् उद्भावयितुम् उर्दू-हिन्दी-पञ्जाबीभाषासु 'गद्दर'-साप्ताहिकम् आरब्धम् ।

'गद्दर'-आन्दोलनस्य आर्थिकावश्यकतानां परिपूर्त्यर्थं प्रत्येकं सभ्यः प्रतिमासम् एक-डोलरमितं धनं ददातु इति सङ्कल्पः कृतः ।

'गद्दर'-आन्दोलनस्य घोषवाक्यम् आसीत् - Enemy of the British Rule in India.

'गद्दर'-आन्दोलनेन निकटः सम्बन्धः आसीत् अतः २५मार्च्१९१४दिने लाला-हरदयालं शासकाः गृहीतवन्तः । प्रथमविश्वयुद्धस्य पटहाः नन्दन्ति स्म तदा शासनस्य स्थितिः दुर्बला भविष्यति इत्येषा मान्यता 'गद्दर'-आन्दोलनस्य शीर्षस्थसमितेः आसीत् ।

अगस्त१९१४मध्ये 'गद्दर'आन्दोलनद्वारा 'भारतं प्रतिनिवर्तन्ताम्' इति घोषेण सह विशालसभा आयोजिता । करतारसिंहसराभा यः बर्कले-विश्वविद्यालयस्य छात्रः आसीत् सः अस्याः सभायाः सर्वयुवा-गद्दरवादि नेतृरूपेण स्थितः ।

भारते विशेषतः उत्तरप्रदेशे बङ्गाले च क्रान्तिकारि यूथानां सम्पर्कं कृत्वा

सङ्घटनकार्यस्य शुभारम्भः कारितः। गद्दरवादिनः भारतं प्रत्यागत्य ग्रामग्रामं प्रवासं कृत्वा जनान् विद्रोहं कर्तुं प्रेरयेयुः ब्रिटिश्–सेनायां स्थिताः भारतीय–सैनिकाः अपि विद्रोहं कुर्वन्तु इत्येतदर्थं विशिष्टसमितीनां रचना जाता।

सामान्यजनतायाः भारतीय–सैनिकानाम् आह्वानार्थं च विभिन्नप्रकारकं साहित्यं सज्जीकृतम्।

श्रीबरकतुल्लाहः काबूलं प्रेषितः। श्रीकपूरसिंह–मोही सन्–याट्–सेन्वर्यं मेलितुं चीनदेशं गतः। श्रीसोहनसिंहभखाना जापानस्थं जर्मनराजदूतन मेलितुं गतः। श्रीतेजासिंह–सुतानतरः टर्किश्–मिलिटरी–अकादम्यां सैनिकरूपेण प्रशिक्षणं प्राप्तुं गतः!

त्रयाणां मुख्यजलपोतानां कामगाटामारू, एस.एस.कोरिया, तथा च नामसेङ्गमाध्यमेन गद्दरवादिनः विशालसंख्यायां भारतं प्रति निर्गताः।

तन्मध्ये भाई–परमानन्दः औषधीयविद्यां प्राप्य लाहोरमध्ये औषधि–उत्पादनकेन्द्रं प्रारब्धुम् इच्छति स्म। उत्पादनस्य आरम्भं कर्तुं प्राथमिकीं सामग्रीं नेतुं, यन्त्राणि च क्रेतुं कतिचित् मासान् लण्डने निवासं कृतवान्। गुप्तचराणां पीडनं सः तत्रापि अन्वभवत्।

प्रथमवारम् इंग्लैण्डं गतः तदा पोतम् इटालीदेशतः गतम् आसीत्। लंडनतः भारतं प्रत्यागमनसमये भाई–परमानन्दः स्विट्झरलेण्डस्य जीनीवातः आगच्छति तादृशस्य पोतस्य चयनं कृतवान्। जीनीवामध्ये सरदारअजितसिंहस्य दर्शनं प्राप्तम्। फ्रैन्च्भाषाया उपरि सुन्दरं प्रभुत्वं प्राप्य आङ्ग्लं तु जानाति स्म एव अतः सरदारः अजितसिंहः शिक्षकरूपेण कार्यं कृत्वा जीवननिर्वहणं करोति स्म।

१९१३दिसम्बरमासस्य अन्तिमे सप्ताहे एकस्मिन् फ्रेन्च्पोते उपविश्य भाई–परमानन्दः मुम्बई–पोतागारं सम्प्राप्तः। साधुचरित्रस्य पुण्यात्मनः भाई–परमानन्दस्य जीवनस्य मुम्बई–प्राप्तौ एव तीव्रसङ्घर्षयुक्तकालस्य आरम्भः जातः।

oooooo

९

देशभक्तिनिमित्तं दण्डः

आङ्ग्लशासनं क्रान्तिकारिजनानां गतिविधिं ज्ञात्वा, प्रथमविश्वयुद्धे उभयपक्षीयं मारं सोढ्वा च व्यथितं जातम् । सितम्बर १९१४वर्षे एकं शासनं प्रसारितं कृत्वा प्रादेशिक-सर्वकारान् विदेशतः भारतं प्रतिनिवर्तमानानां भारतीय-समेतानां सर्वेषां ग्रहणस्य सत्ता दत्ता । लुधियानामध्ये प्रवासिभारतीयानां विशिष्टम् कारागृहम् स्थापितम् ।

विष्णुगणेशपीङ्गळे, रासबिहारी-बोस, भाई-परमानन्द, हाफिझ-अब्दुल्ला, साचीन्दरनाथ-सन्याल-आदीनाम् उच्च-सङ्कलनसमितिः जाता । अमृतसरे नियन्त्रणकेन्द्रं स्थापितं, किन्तु सुरक्षाकारणैः इदं केन्द्रं ६फरवरी१९१५दिने लाहोरे परिवर्तितम् ।

२१फरवरीदिने मीया-मीर, मेरठ, लाहोर, दिल्ली सदृशानि महत्त्वपूर्णानि सैन्यस्थानानि हस्तगतानि कृत्वा 'रिपब्लिक आफ इंडिया'इत्यस्य घोषणायाः निर्णयः जातः । रक्त-हरित-पीतवर्णयुतः त्रिरङ्गध्वजः यस्य मध्यभागे खड्गद्वयस्य (**X**) रचना स्यात् तादृशः ध्वजः निश्चितः जातः ।

अनेन विद्रोहेण ब्रिटिश्-शासनस्य होङ्गकोङ्गतः पेशावरपर्यन्तं सर्वतः आक्रमणस्य योजना निश्चिता आसीत् । अस्याः योजनायाः विषये ब्रिटिश्-सत्ताधीशाः कथमपि ज्ञातवन्तः येन 'विद्रोहदिनं' २१फरवर्याः स्थाने १९फरवर्यां परिवर्तितः ।

भारतीय-सैनिकाः सेनाशिविरेषु एव निःशस्त्रीकृताः । ८२गद्दरवादिजनानां विरुद्धं २६अप्रैल्१९१५दिने 'Lahore Conspiracy Case'नामकः अभियोगः आरब्धः । शतशः संख्यायां जनानां ग्रहणं जातम् । १७जनाः पलायिताः उद्घोषिताः तेषां विरुद्धम् आन्तरराष्ट्रियं निर्जामीनपात्रं शासनम् उद्घोषितम् ।

२५अक्तूबर१९१५दिनतः अभियोगस्य निर्णयश्रवणम् आरब्धम् । भाई-परमानन्दस्य शुद्धचारित्र्यं तपश्चर्या च पञ्जाब-सर्वकारस्य नेत्रे कण्टकमिव आस्ताम् ।

एषः कण्टकः मूलत एव उत्पाटनीयः इति सर्वकारस्य साध्यम् आसीत्। साध्यं साधयितुं ते यत्किमपि साधनम् उपयोक्तुम् उद्युक्ताः आसन्। तत्र पञ्जाबस्य सेवकप्रथायाः कृते न्यायान्यायस्य धर्माधर्मस्य विषये चिन्तनस्य नासीत् कापि आवश्यकता।

सर्वकारिक प्रकोपतः भयभीताः महाविद्यालयस्य अधिकारिजनाः भाई परमानन्दस्य आजीवन सदस्यतां समापितवन्तः। यातनायां भाई परमानन्दस्य जीवनं सङ्कटग्रस्तं जातम्।

oooo

१०

न्यायरूपेण नाटकम्

विद्रोहं कर्तुम् इच्छुकं यूथं स्वीयं जालं गुप्ततया प्रसारयति स्म । कृषकानां मध्ये असन्तोषः वर्धितः आसीत् । लाला हरदयाल, करतारसिंह, रासबिहारी बोस आदीनां निर्देशानुसारं स्थाने स्थाने आक्रमणानि भवन्ति स्म । इत्थं सर्वतः आक्रान्तः पञ्जाब सर्वकारः भाई-परमानन्दसदृशं पवित्रं मानवं पञ्जाबप्रान्ते मुक्तं भ्रमन्तं नेच्छति स्म ।

भाई परमानन्दस्य पत्राणाम् उपरि दृष्टिः निधेया इति आदेशः अभवत् । तस्य पत्राणि प्रप्रथमं तु उपनिरीक्षकस्य कार्यालयं गच्छन्ति स्म । ततः सप्तदिनानन्तरं 'सेन्सर' इति मुद्रया सह पत्रं भाईजी प्राप्नोति स्म । एषा प्रणाली मासचतुष्टयं यावत् चलिता तथापि तादृशम् एकमपि पत्रं न प्राप्तं येन भाई परमानन्दस्य उपरि कोऽपि आक्षेपः कर्तुं शक्येत ।

लघु-बृहत्, आवश्यकानवश्यकैः विविधैः कारणैः आरक्षकाः वारंवारं भाई-परमानन्दं प्रश्नान् कर्तुम् आगच्छन्ति स्म । गुप्तचराणां दृष्टिः दिवानिशं भाईजी-उपरि भवति स्म । भाई-परमानन्दं येन केनापि प्रकारेण ग्रहीतुम् इच्छन्ति स्म सर्वकारः अतः न किमपि शङ्कास्पदं प्राप्तं तथापि भाई परमानन्दः बन्धने निक्षिप्तः । श्रीपैटमेनः सर्वकारपक्षीयः वाक्कीलः आसीत् लाला रघुनाथ सहायः भाईजी-पक्षीयः वाक्कीलः आसीत् ।

कारागारे निलम्बनदण्डस्य प्रकोष्ठे निक्षिप्य, सर्वकारस्य अधिकारिजनाः साम-दाम-दण्ड-भेदानां कूटनीतीनाम् उपयोगं कृत्वा सन्तापनं कृतवन्तः । आरक्षकाः भाई-परमानन्दस्य करतारसिंहेन लाला हरदयालेन अमेरिकादेशस्य गद्दरसंस्थया सह च सम्बन्धं योजयितुम् इच्छन्ति स्म । किन्तु भाई-परमानन्दः गुप्तकार्यक्रमतः दूरे आसीत् अतः स्वीकारं न कृतवान् ।

कारागारे भाई परमानन्द विरुद्धं यः अभियोगः चालितः सः न्यायस्य स्थाने न्यायस्य उपहासः एव गणयितुं शक्यते । सर्वकारस्य क्षमां प्राप्तवन्तः दोषिताः

जनाः (विद्रोहकार्ये सम्मिलितानां) अभिज्ञानसमये भाईपरमानन्दस्य अभिज्ञानं कर्तुम् आनीताः। दोषितः जनः अग्रे चलति कारागारस्य अधिकारी च पृष्ठे। मूळसिंहनामकः अभिज्ञानकर्ता भाईपरमानन्दतः अष्ट–नवजनान् उल्लंघ्य अग्रे निर्गतः। किन्तु कारागारस्य अधिकारिणा सङ्केतः कृतः येन मूळसिहः प्रतिनिवृत्तः तथा च भाईपरमानन्दस्य पुरतः स्थितः। तदानीमेव भाईजी सर्वकारि वाक्कीलस्य ध्यानं कर्षितवान् किन्तु कारागारस्य अधिकारी तं मौनं धारयितुं निर्दिष्टवान्।

समग्र प्रक्रियायां भाईपरमानन्दद्वारा ये तर्काः तथ्यानि च प्रस्तुतानि तानि निरस्तानि कुर्वन् सर्वकारि–वाक्कीलः श्रीपैटमेनः उक्तवान् "भाईपरमानन्दः तु लाला–हरदयालस्य गुरुः अस्ति। सः तादृशः चतुरः अस्ति येन सः स्वविरुद्धम् एकमपि प्रमाणं न रक्षितवान्। अयं तु सस्ये गुप्तः सर्पः इव भयङ्करः अस्ति इति।"

प्रमाणानि तु नैव आसन्! अतः अयमेव सर्वकारि–वाक्कीलः पञ्जाब–सर्वकारम् अभियोगं त्यक्तुम् उपदिष्टवान्। किन्तु ओडवायरस्य सर्वकारः आज्ञां कृतवान् यत् – 'भवन्तः स्वनियमानुकूलं कार्यं धारयन्तु इति।' अर्थात् विशेषतया नूतनान् नियमान् निर्माय तदनुसारं राजकीय–बन्धकानाम् अवमर्दनस्य पञ्जाबसर्वकारस्य स्पष्टः उद्देशः आसीत्।

न्यायस्य नाटकानन्तरं प्रायः मासद्वयानन्तरं भाईपरमानन्दः गलग्रहस्य (फांसी)दण्डं प्राप्तवान्।

१३सितम्बरदिने निर्णयः श्रावितः योगतः २४नरवीराः गलग्रहस्य दण्डं प्राप्तवन्तिः। निर्णयं श्रुत्वा सर्वे वीराः हर्षेण परस्परम् आलिङ्गनं कृतवन्तः! केचन तु देशभक्ति--गीतानि गातुम् आरब्धवन्तः। अस्य आनन्दस्य कोलाहलम् असहमानाः कारागारस्य अधिकारिजनाः सर्वान् स्व–स्वप्रकोष्ठे निक्षिप्य पिहितवन्तः। गलग्रहस्य प्राप्तदण्डाः दोषिजनाः एकस्य विशाल–द्वारस्य पृष्ठे लघुप्रकोष्ठेषु पिधीयन्ते स्म निरुद्धाः।

गलग्रहः(फांसी)अर्थात् जीवनस्य अन्तः एनं शब्दं श्रुत्वा हि कठोरतमहृदयवान् मनुजः अपि विह्वलः भवति। किन्तु मातुः भारत्याः कृते प्राणान् त्यक्तुं न्योच्छावरं कर्तुं कृतसङ्कल्पानां वीराणाम् उद्गाराः कीदृशाः आसन्? एकः आजीवन–कारावासस्य

दण्डं श्रुत्वा तत्क्षणमेव उक्तवान् – "अहं गलग्रहस्य दण्डम् इच्छामि।" करतारसिंहः फासीदण्डं श्रुत्वा उक्तवान् – "थेङ्क यू" अर्थात् अहं भवतां धन्यवादं व्याहरामि।

कः अयं करतारसिंहः खलु ? पञ्जाबमध्ये या गुप्ता विद्रोहवृत्तिः चलति स्म तस्याः नेता करतारसिंहः आसीत्। १९वर्षीयस्य अस्य नवयुवकस्य साहसं पुरुषार्थः च आश्चर्यजनके आस्ताम्। लुधियाना-निवासी करतारसिंहः सप्तमकक्षां यावत् खालसा-शालायाम् अभ्यासं कृत्वा, अभ्यासं त्यक्त्वा अमेरिकागमनाय निर्णयं कृतवान्।

अमेरिकायां दिवसभागे उद्यमं कृत्वा रात्रिशालायाम् अभ्यासम् आरब्धवान्। गद्दर-आन्दोलने रुचिः उत्पन्ना अतः तस्मिन् करतारसिंहः सक्रियः जातः। विश्वयुद्धस्य आरम्भः अभवत् अतः भारतम् आगत्य स्वशाला-समयस्य सहाध्यायि-छात्रान् एकत्रीकृत्य तेषां नेता अभवत्। अमेरिकातः अपि गद्दर-आन्दोलनस्य कायकर्तारः भारतं प्रतिनिवृत्य करतारसिंहस्य नेतृत्वे युक्ताः सक्रियाः च अभवन्। सर्वे जनाः स्वस्य एव आज्ञापालनं कुर्वन्तु इति करतारसिंहस्य आग्रहः आसीत्। यदि कश्चित् न मन्यते चेत् सः एकेन ब्रह्मवाक्येन सर्वान् मूकीकरोति स्म। तद् ब्रह्मवाक्यम् आसीत् – "इदं भाईपरमानन्दस्य मतम् अस्ति, अहं तं पृष्ट्वा आगतः अस्मि।" इमां वार्तां यदा भाईजी ज्ञातवान् तदा सः अस्मिन् विषये करतारसिंहं पृष्टवान् तदा तदा सः कथितवान् "अहं तु एवं न उक्तवान्" इति। किन्तु भाईपरमानन्दः तं याथार्थ्येन जानाति स्म अतः तस्य पूर्णः विश्वासः आसीत् यत् करतारसिंहः तस्य नामोल्लेखेन हि कार्याणि साधयति इति।

कारावासे एकदा भाईजी करतारसिंहं पृष्टवान् यत् अमेरिकायाम् आनन्देन निवासं त्यक्त्वा भारतीय-कारावासस्य प्रताडना किमर्थम् स्वीकृता ? करतारसिंहः उत्तरितवान् यत् अमेरिकायां स्थानिकजनाः तिरस्कारेण गालिप्रदानेन च हिन्दुजनान् बोधयन्ति स्म तत् सः सोढुं न शक्नोति स्म।

संवादम् अग्रे सारयन् भाईजी पृष्टवान् करतारसिंहः स्वकार्येषु भाईपरमानन्दस्य नाम किमर्थं योजितवान् इति ? करतारसिंहः तत्रापि भाईपरमानन्दस्य एव दायित्वम् इति प्रमाणयन् अमेरिक-देशीयाम् औषधापणस्य घटनां स्मारितवान्।

अमेरिकायाम् औषधनिर्माणस्य प्रक्रियायाः प्रशिक्षणसमये तस्मिन् आपणे

भाईपरमानन्दं मेलितुं करतारसिंहः एकदा अगच्छत् । करतारसिंहस्य मणिबन्धे व्रणः आसीत् । वार्तालापमध्ये भाईजी पृष्टवान् यत् किं करतारसिंहः भारतस्य इतिहासं जानाति ? करतारसिंहः कथितवान् 'आम्'।

भाईपरमानन्दः अवदत्, यस्याः मृतप्रायायाः दासत्वं प्राप्तायाः प्रजायाः उपरि सप्तशतं वर्षाणि यावत् पश्चिमोत्तरदिशातः पुनः पुनः आक्रमणानि जातानि, असंख्यजनाः दासत्वे नियुज्य अपहृताः, अनेके सस्यवत् स्वमस्तकानि छेदितवन्तः तादृश-जात्याः प्रजायां पञ्जाबे च चमत्कारं सृष्ट्वा शक्तिः कथम् उत्पन्ना ?

कथम् इयं शक्तिः इयती प्रचण्डा जाता या न केवलम् आक्रमणानि अवरोधितवती अपि तु तेषाम् अन्यदिशायां परावर्तनं कृतवती ! भाईजी करतारसिंहं गुरुगोविन्दसिंहस्य त्याग-पराक्रमयोः विषये वार्तां कुर्वन् तस्य वाक्यमिदं कथितम् -

'चिडिया से मैं बाज लडाउं, तब ही गुरु नाम गोविदसिंह पाउं ।'

अमेरिकादेशीयाम् औषधापणस्य इमां वार्तां स्मारयन् करतारसिंहः भाईजीं कथितवान् यत् तां कथां श्रुत्वा तस्याम् एव रात्रौ भारतमातुः कृते शिरः कर्तनीयम् इति दृढसङ्कल्पः कृतः ।

विलम्बनमञ्चः समक्षः भवेत् तदा हृदयस्य परीक्षा भवति । सामान्यतया मनुष्यः वीरदर्शनः भवति। यशः-प्रशंसाप्राप्तिसमये तु वीरता प्रकटरूपेण दर्शयन्ति जनाः किन्तु क्रोधे उत्साहे च वीरत्वप्रकटनं भिन्ना वार्ता भवति, यदा उत्साहस्य अवसरः एव न सम्प्राप्यते तदा तत्र लघुप्रकोष्ठमध्ये अन्धकारं विहाय अन्यत् मित्रमपि न भवति तत्र प्रशंसकानां तु का कथा ? वार्तालापकर्ता अपि न कोऽपि लभ्यते। अस्याम् अवस्थायां मनः शिथिलं भवति।

मनः शिथिलं कुर्यात् वा आशङ्कामग्नं चिन्ताग्रस्तं वा कुर्यात् तादृशः नरवीरः भाईपरमानन्दः अपि न आसीत् तर्हि तस्य संसर्गं सेवमानः करतारसिंहसदृशाः अन्ये अपि कथं तथा भवेयुः ? धन्या खलु जगत्-जननी भारतमाता या ईदृशान् नरोत्तमान् सृष्टवती !

००००००

११

कारागृहे बन्धकः भाईपरमानन्दः

कारागृहे भाईपरमानन्दः स्वभावि-विषये चिन्तितः न आसीत् । न च मृत्योः भयभीतः आसीत् । अतः पत्रं विलिख्य स्वपत्नीम् आहूतवान् । पत्रे निर्देशं कृतवान् यत् मिलनसमये कश्चित् प्रकारकः शोकः दुःखं वा न प्रकटनीयम् ! पत्नी पुत्र्यः च मेलितुं समायाताः । पत्नी उदासीना आसीत् किन्तु मुखस्योपरि धैर्यं दृष्ट्वा भाईजी सन्तुष्टः अभवत् ।

तृतीयदिने तस्य पत्नी पुनः मेलितुं समागता । कठोरहृदयाः बन्दीगृहस्य अधिकारिणः सम्बन्धिजनानां मिलनसमये कठोरां व्यवस्थां कृतवन्तः । सायं समये एव मेलनं शक्यं भवेत् तथा समयः निश्चितः । कोष्ठतः बहिः लघु अजिरम् आसीत् । अजिरे एकं विशालं द्वारम् आसीत् तस्मिन् छिद्रयुक्ता जालिका आसीत् । द्वारतः बहिः मिलनेच्छुकः आगन्तुकः भवति । बन्धकः अङ्गणे जालिकासमीपे स्थित्वा केवलं वार्तालापं कर्तुं शक्नोति । परस्परं मुखावलोकनम् अशक्यं भवेत् तादृशी इयं व्यवस्था आसीत् ।

भाईपरमानन्दसहितान् सर्वान् बन्धकान् निलम्बनस्य दण्डः कर्तव्यः वा आजीवन-कारावासस्य व्यवस्था कर्तव्या इत्यस्मिन् विषये 'वाईसरोय'वर्यस्य कार्यकारिणी समितिः चिन्तनं करोति स्म । अस्य अवसरस्य लाभं गृहीत्वा भाईपरमानन्दस्य पत्नी लाला-रघुनाथ-सहायं दूरलेखं लिखितवती । लालाजी स्वयं सिमलां गत्वा कार्यकारिणी-सभायाः सभ्यान् मिलितवान् । पंडित-मदनमोहन-मालवियं मिलित्वा सम्पूर्णम् अभियोगं ज्ञापितवान् । २४तः १७जनानां निलम्बनस्थाने आजीवन-कारावासस्य दण्डः भवेत् तथा आज्ञां कारितवान् ।

अन्दामानस्य कालप्रकोष्ठेषु वर्षाणि यावत् यमयातनाः सोढव्याः इति भाई-परमानन्दस्य मस्तके आपतितम् ।

प्रत्यकमहापुरुषस्य स्वविचारैः व्यवहारैः च कुटुम्बजनानाम् उपरि एकः निश्चितः संस्कारः उद्भवति । भाईपरमानन्दस्य ज्वलन्त-दृष्टान्तस्य पृष्ठे तस्य प्रेरणस्रोतः

तस्य पत्नी आसीत् । अस्य असाधारण-प्रेरकबलस्य वर्णनं विख्यातः भारतभक्तः आङ्ग्लः श्रीसी.एफ.एण्ड्रुझः कृतवान् । सः लिखति - "लाहोरस्य सङ्कुचित-वीथ्याः एकस्याम् आक्लेदपूर्णायां प्रगोलिकायां भाईपरमानन्दस्य पत्नी स्वबालिके अङ्के उपवेश्य स्थिता आसीत् । उभयोः पुत्र्योः मुखे रुग्णतया म्लाने अभवताम् ।"

एषा पतिव्रता स्त्री एकस्यां कन्याशालायां भृत्यं कृत्वा, १७रूप्यकाणां मासिकवेतनेन स्वीयं बालिकयोः च निर्वहणं करोति स्म । दीनतायां दारिद्र्ये च तस्या ईश्वरं विहाय न किमपि शरणम् । भाईपरमानन्दः आफ्रिकदेशानां यात्रार्थं गतः तदा तत्रत्याः प्रवासिभारतीयाः यानि सम्मानपत्राणि प्रशंसापत्राणि च लिखितवन्तः तदेव पत्न्याः समीपे दायरूपं धनम् आसीत् ।

भाईपरमानन्दस्य स्वपत्न्याः उपरि कियान् विश्वासः आसीत् यत् आजीवन-कारावासस्य दण्डसमये अनेकेषां दुःखानां मध्ये निवासं कृत्वा अपि तस्य मनसि स्वपत्न्याः-पुत्र्योः विषये च कदापि चिन्ता विषादः वा न उत्पन्नः । अन्दामानस्य कारागारवासे कारागारस्य अधीक्षकेण एकदा भाईजी पृष्टः - "यदि भवते अस्मात् कारावासात् मुक्तिः मिलति चेत् भवान् कम् उद्योगं करिष्यति ?" भाईजी प्रत्युत्तरं दत्तवान् "अहम् अधुना तद्विषये किमपि निश्चितं कथयितुं न शक्नोमि किन्तु इदं तु निश्चितं यत् यदि अहं कमपि उद्योगं न प्राप्स्यामि तर्हि मम पत्नी कन्याशालायां पाठयिष्यति अहं च गृहं पालयिष्यामि "। भाईपरमानन्दस्य मर्मयुक्ते अस्मिन् उत्तरे तस्य पत्न्याः उपरि निहिता श्रद्धा निर्भयता च दृग्गोचरीभवति ।

बहिस्तने संसारे राजकीय-बन्धकानां दण्डं न्यूनीकर्तुं प्रयत्नाः चलन्ति स्म तदा लघुकोष्ठेषु भाईजीसमेतं सर्वेऽपि बन्धकाः आनन्द-प्रमोदेन स्वदिनक्रमं यापयन्ति स्म । दिनाभ्यन्तरं नैकोऽपि क्षणः तादृशः भवति स्म यस्मिन् कश्चिद् बन्धकः भजनं राष्ट्रियगीतं न गायति स्म । मध्यरात्रिं यावत् स्वस्व-प्रकोष्ठतः परस्परं वार्तालापः प्रचलति स्म ।

अस्य आनन्दस्य अनुभवं कुर्वन्तः रक्षकाः आश्चर्यान्विताः भूत्वा पृच्छन्ति यत् - 'किं भवन्तः वरयात्रां गच्छन्ति उत निलम्बनमञ्चम् आरोढुं सज्जाः भवन्ति ?' सः वराकः एतेषां वीराणां निलम्बनोत्साहं कथम् अवगन्तुं पारयेत् !

सप्तमदिने निलम्बनं भविष्यति इति अनुमानम् आसीत् । पूर्वरात्र्यां भाईपरमानन्दस्य सहपुरुषाः झटिति जागृताः । करागाराधिकारिजनाः तान् नेतुम् आगमिष्यन्ति इति तेषाम् अनुमानम् आसीत् अतः तेषां प्रतीक्षां कृतवन्तः । किन्तु भाईजी तु तस्य प्रातिदैनिक–क्रमानुसारमेव उत्थितः । एवमपि सः अन्येषाम् अपेक्षया अधिकां निद्रा करोति स्म ।

अनेन प्रकारेण द्वितीय दिने अपि जातम् । किन्तु कः अपि अधिकारी नेतुं न आगतः । अतः तेषाम् उत्साहः किञ्चित् मन्दः जातः । किन्तु ते निश्चिताः भूत्वा आनन्दमग्नाः अभवन् ।

भाईजी व्यक्तिगतरूपेण कोष्ठके केवलम् एकमेव दुःखम् अनुभवति स्म । यत् तत्र सूर्यकिरणाः न आगच्छन्ति स्म । तस्य मनः सूर्यकिरणान् आतपस्य च कृते व्याकुलं भवति स्म ।

भाईपरमानन्दस्य मनसि संसारस्य कृते मोहः न आसीत् । जीवनस्य कृते ममता न आसीत् । जीवने तस्य एका एव लालसा आसीत् यत् सः विश्वयुद्धस्य प्रसङ्गं द्रष्टुम् इच्छति स्म । स्वस्य चित्तस्य परीक्षां कुर्वन् भाईजी पृष्टवान् "अनेन मिषेण किं जिजीविषा तु चित्ते रूपान्तरिता भूत्वा न वर्धते ? मनसि कापि तुच्छभावना उत्पन्ना न भवेत् तदर्थं भाईजी कियत्कठोरतया जागृतिं धारयति स्म !!"

'आर्य–गेजेट्'इत्यस्य सम्पादकः श्रीखुशहालचन्दः यदा भाईपरमानन्दं मेलितुम् आगतः तदा सः निलम्बनस्य कोष्ठे पिहितं भाईजीं पृष्टवान् – "मृत्युः कियत् भयङ्करं भाति ?" तदा भाईजी प्रत्युत्तरं दत्तवान् यत् –"अयं तु अस्माकं व्यर्थः भ्रमः भवति यत् मृत्युः भयानकं भवति । यदा तत् सर्वथा निकटे भवति तदा तु अत्यन्तम् आकर्षकं लगति । विशेषतया तादृशं मृत्युः यस्य कृते मनुष्यः पूर्वतः सज्जः भवेत् ।"

प्रायः १५नवम्बरस्य दिने दण्डस्य न्यूनीकरणस्य समाचारं भाईजी प्राप्तवान् । २४मध्ये १७बन्धकाः अन्यत् कारागृहं नीताः । करतारसिंहः, पीङ्गळे, जगतसिंहः, हरनामसिंहसमेतं सप्तजनाः निलम्बनस्य कोष्ठे हि स्थापिताः ।

अपरदिने प्रातःकाले एते सप्त भारतरत्नाः निलम्बनमञ्चं प्रति नीताः । यदा अन्तिमा इच्छा पृष्टा तदा पिंगळे ईश्वरं प्रार्थयितुम् इच्छां प्रकटितवान् । यदा निगडबन्धनतः मुक्तः तदा सः करौ संयोज्य ईश्वरं प्रार्थितवान् – "हे ईश्वर ! भवान् अस्माकं मनसः कथां जानाति । यत् पवित्रं कार्यं कर्तुं वयं जीवनस्य आहुतिं यच्छामः तत् भवान् रक्षतु – इयमेव अस्माकम् अन्तिमा इच्छा अस्ति ।" तदनन्तरं स्वगले निलम्बनरज्जुं निक्षिप्य सर्वे अपि सानन्दम् अन्तिमयात्रार्थं सज्जाः जाताः ।

भाईजी समेतं सर्वेऽपि आजीवन-कारावासः भविष्यति इति समाचारेण विदिताः जाताः । देशनिष्कसनस्य यातनानां दुःखं न आसीत् किन्तु केचन सहयोगिनः निलम्बनद्वारा वियुक्ताः जाताः तस्य दुःखम् आसीत् । अधुना आजीवन-कारावासस्य यात्रायाः विषये अनेके भावाः सर्वेषां मनसि उद्भूताः ।

ooooo

१२

देशनिष्काषण दण्ड:

देशस्य कृते वीरगतिं याचमानाः स्वच्छन्दाः भवन्ति । मनः यदा स्वानन्दे मग्नं भवति तदा चित्तस्य तरङ्गाः स्वच्छाः, भावनायुक्ताः, दिशानिर्देशकाः च भवन्ति । तेभ्यः उत्पद्यमानाः शब्दाः भावि–युगास्य कृते मार्गदर्शकाः भवन्ति ।

क्रान्तिकारि–प्रवृत्तिभिः सह युक्ताः सर्वे जनाः काव्य–रचनायां रुचिं धारयन्ति स्म । तेषु केचन तु पञ्जाबी तथा उर्दूभाषायाः उत्तमाः कवयः आसन् । भाईपरमानन्दस्य गझलकाव्ये विशेषा रुचिः न आसीत् । किन्तु कोष्ठस्य स्वतन्त्रजनाः एकं गझलकाव्यं गायन्ति स्म तस्य कानिचित् चरणानि भाईपरमानन्दस्य स्मृतौ स्थितानि । तानि चरणानि यथा –

यहीं पाओगे महशर में जबों मेरी, बयाँ मेरा ।
मैं बन्दा हिन्दवालों का हूँ है हिन्दुस्ताँ मेरा ।
मैं हिन्दी, ठेठ हिन्दी, खून हिन्दी, जात हिन्दी हूँ ।
यही मजहब, यही भाषा, यही है खानदाँ मेरा ।
मैम् इस उजडे हुए भारत के खंडहर का इक जर्रा हूँ ।
यही बस इक पता मेरा, यही नामोनिशाँ मेरा ।
कदम लूँ मादरे भारत तेरे मैं बैठते उठते ।
कहाँ किस्मत मेरी ऐसी, नसीबा यह कहाँ मेरा ।
तेरी खिदमत मेम् ऐ भारत यह सर जाए यह जी जाए ।
तो मै समजूङ्गा यह मरना हयाते जादवाँ मेरा ।

दण्डस्य न्यूनीभवनान्तरं षट्–सप्तदिनानन्तरम् आजीवन–कारावासस्य दण्डं

प्राप्तवतां बन्धकानां मानं मापितम् । कारागारस्य अधिकारिजनाः सूचितवन्तः यत् बन्धकाः यदि स्वजनान् मेलितुम् इच्छन्ति चेत् पत्रं लिखित्वा तान् यथा शीघ्रम् आगमनाय सूचयन्तु इति वास्तवतया इदं केवलम् कपटम् आसीत् कारणं तस्मिन् दिने एव सायङ्काले आजीवन-कारावासबन्धकानां कृते धारणाय उरुकं, युतकं, धौतं, कम्बलद्वयं च दत्तानि । सर्वेषां पादयोः लौहशृङ्खला एकैकस्य हस्तः अपरेण बन्धकेन सह बद्धः भवेत् तथा हस्तशृङ्खला बद्धा ।

एकस्मिन् याने उपवेश्य सर्वे बन्धकाः 'छावणी'स्थानकात् रेलयानस्य पथिकयाने उपवेश्य तं पथिकयानं रेलयानेन सह योजयित्वा तस्याम् एव रात्रौ पञ्जाबस्य सीमापारं कारिता । पञ्जाबस्य वीरवती-भूमेः अन्तिमदर्शनस्य अवसरम् अपि ते न दत्तवन्तः ।

यत्र यत्र यानं स्थगितं भवति तत्र तत्र यात्रिजनानां सम्मर्दः मत्ताधीशानां गीतानां शब्दान् श्रुत्वा एकत्रितः भवति स्म । निमेषद्वयं गीतानि श्रुत्वा यात्रिकाः मत्तजनान् अवजानन्ति स्म ।

मार्गे मेहनशौचादिगमनसमये बन्धकद्वयेन सार्धमेव गन्तव्यं भवति स्म । कारणं द्वयोः हस्तौ परस्परं बद्धौ भवतः स्म । अनेकानि कष्टानि उत्तीर्य विनाशयनं सर्वे बन्धकाः दिवानिशत्रयं व्यतीतं कृत्वा कोलकाता-स्थानके अवतारिताः । पूर्वसूचनाभावात् न कापि विशिष्टा रक्षणव्यवस्था आसीत् अतः बिहारराज्यस्य रक्षापुरुषः भाटकस्य यानेन सर्वान् प्रेसिडेन्सीकारागारं नेतुं व्यवस्थापितवान् ।

अर्धरात्रिः व्यतीता आसीत् । गणनां कृत्वा सर्वे बन्धकाः आजीवन-कारावासीय-कक्षं प्रेषिताः । पादयोः शृङ्खला, हस्तयोः हस्त-शृङ्खला, मस्तके कम्बलं, वस्त्राणि, कटः, मुक्ते हस्ते लौहचषकान् नीत्वा कक्षे प्रविश्य एव सर्वे स्वस्वकम्बलानि आस्तीर्य सुप्ताः ।

मनुष्यः तादृशः प्राणी अस्ति यः स्वशिरसि निपतमानाः सर्वाः विपत्तीः सोढुं शक्नोति । भाईजी यानि कष्टानि सोढवान् करोति स्म ततः सः चिन्तयति स्म यत् स्वर्गस्य सोपानतः सः अधः निक्षिप्तः तथा च सर्वे नरकस्य द्वारं प्रवेष्टुम् उपस्थिताः ।

आजीवनकारावासस्य दण्डिताः बन्धकाः विभिन्न-कारागारतः एकत्रीकृत्य वर्षाभ्यन्तरं नववारम् अन्दामानं यत् 'महाराज'नामकं जलपोतं गच्छति स्म तत् १५दिनानन्तरं कोलकातानगरं प्राप्तम्। आगमनानन्तरं पोतं ६दिनानि तत्रैव स्थितम्। सायंसमये शताधिकान् बन्धकान् कारागारतः बहिः निष्कास्य द्वि त्रिमाईल्पर्यन्तं चालयित्वा जलपोतं प्रापिताः। एतेषु त्रि चतुर्महिलाः अपि आसन्।

त्रयाणां दिवारात्रीणाम् अन्दामानपर्यन्तं यात्रा चिरस्मरणीया अभवत्। त्रीण्यपि दिनानि 'चिवडा'आहारः, बाष्पितचणकाः, पक्व शर्कराआहार सदृशानि मिष्टवस्तूनि भोजने मिलन्ति स्म। सर्वेऽपि मिलित्वा भूरिशः गीतानि गीत्वा समयं यापयन्ति स्म। उच्यते अपि मनुष्यः तादृशः प्राणी अस्ति यः सर्वतः आपत्तिभिः आकुलितः सन् अपि अन्येषां सहवासं प्राप्य सर्वाणि कष्टानि सोढ्वा अपि सहवासस्य आनन्दं प्राप्तुं शक्नोति।

चतुर्थदिने पोतस्य लघुगवाक्षतः बहिः दृष्टिपातं कृतवन्तः तर्हि अन्दामानस्य वनानि दृष्टानि। किञ्चित्कालानन्तरं हि विशालपर्वतस्य उपरितनः दुर्गः दृष्टिगोचरः अभवत्। रक्षाकर्मकराः ज्ञापितवन्तः यत् अयमेव दुर्गः 'सेल्युलर्जेल' इति अस्ति। यत्र भाईपरमानन्दसहितं सर्वैः बन्धकैः शेषं जीवनं यापनीयम् अस्ति।

जलपोतः स्थगितः, एकः चिकित्सकः सर्वेषां परीक्षणं कृत्वा सर्वान् पङ्क्तिशः जलपोततः अवतार्य, मस्तके सर्वं आवरणम् उत्सेप्य पर्वतम् आरोहयित्वा कारावासस्य द्वारं यावत् परस्परं वार्तालापं कर्तुं न शक्नुयुः तथा रक्षकाः सर्वान् बन्धकान् प्रापितवन्तः। द्वारतः अन्तः प्रवेशानन्तरम् एकं लम्बं-बलिष्ठम् आयरिशजनाय परिदाय रक्षकाः प्रतिनिवृत्ताः।

सामान्यतया नूतनाः बन्धकाः अत्र षण्मासान् वा एकवर्षं यावत् निधीयन्ते स्म। तदनन्तरं भिन्न-भिन्नद्वीपेषु तेषां प्रेषणं भवति स्म। तेषां समीपे सर्वकारस्य कार्याणि कारयित्वा रात्रौ अष्टवादनं यावत् पुनः तेषां कक्षे आनीयन्ते स्म। यदि बन्धकेषु कस्यचिद् व्यवहारः सुयोग्यः भवेत् तर्हि कतिचिद् वर्षानन्तरं सः स्वतन्त्रः भवति स्म। किन्तु इत्थं भाग्येन हि भवति स्म।

बन्धकेषु कुख्यातं 'कारागार-परमेश्वरम्' अविज्ञाय सेल्युलर कारागृहस्य भयानकता किं ज्ञातुं शक्या ? 'बारीसाहेब' नामकस्य अस्य दीर्घकाय-कारागाराध्यक्षस्य विशेषता इयम् आसीत् यत् तस्य सेवाकालस्य महत्तमानि वर्षाणि भारतस्य भयानकैः बन्धकैः सह तेन यापितानि। एतादृशानां बन्धकानां सुदीर्घानुभव-फलं तदासीत् यत् तस्मिन् मानवतायाः एकः अपि गुणः अवशिष्टः न आसीत्।

सः बन्धकान् विहाय अन्य-भारतीयान् आङ्ग्लजनान् वा न मिलति स्म। वार्तालापम् अपि न करोति स्म। कारावासे विशेषाधिकारं प्राप्तवन्तः बन्धकाः, टंडेलजनाः, कोशाध्यक्षः, नायकः इत्यादयः बारीमहोदयस्य चाटुकारितां कुर्वन्ति स्म येन सः आत्मानं सम्राजं मन्यते स्म। वदति स्म च 'अहम् अस्य कारागृहस्य परमेश्वरः अस्मि इति !'

बारीमहोदयस्य २५तः अधिकानि वर्षाणि बन्धकानां मध्ये एव व्यतीतानि अतः तस्य स्वभावः अपि बन्धकसदृशः एव सञ्जातः। बन्धकैः सह आदिनं वार्तालापं कुर्वन् सः बीभत्सान् उपहासान् करोति स्म तथा च परस्परं बन्धकानां कलहं कारयति स्म। चातुर्येण अन्योन्यस्य चारत्वं कारयति स्म।

भाईपरमानन्देन सह नूतनाः बन्धकाः यदा अन्दामानं प्राप्ताः तदा बारीमहोदयस्य किञ्चित् व्यग्रः जातः। तत्क्षणं कोशाध्यक्षम्, अध्यक्षं च आहूय भाईपरमानन्दस्य यूथस्य गुप्तचरीं कर्तुं स्थापितवान्। सद्यः अस्य समूहस्य आगमनेन कारागारे विचित्रप्रकारस्य मशकवर्तनम् आरब्धम्।

प्रवेशद्वारे हि बारीमहोदयस्य भाषणं श्रुत्वा यदा एव भाईपरमानन्दः कारागारस्य कक्षे प्रवेशं कृतवान् तदा तत्र लिपिकाररूपेण कार्यं कुर्वन्तौ द्वौ बन्धकौ पृष्टवन्तौ – 'भाईपरमानन्दः कः अस्ति ?'

००००००

१३

अन्दामानस्य आतङ्कः

कारागारस्य जीवनं तत्रापि आजीवनकारावासाय सेल्युलरकारागृहस्य जीवनं नैकदृष्ट्या भिन्नं भवति। पशुना सह पाशवी व्यवहारः संभवः अस्ति सः कदाचित् सह्यः अपि भवेत्। किन्तु परमात्मनः वासः यस्मिन् अस्ति तादृशेन मनुष्येण सह पाशवी व्यवहारस्य अनुभवः न कदापि विस्मर्तुं शक्यः।

अन्दामानस्य सेल्युलर-कारागृहस्य बन्धकतः यानि कठोर-परिश्रमस्य कार्याणि कार्यन्ते स्म तेषु नारिकेलस्य विशेषं महत्त्वम् आसीत्। नारिकेलस्य त्वचः कुट्टनस्य कार्यं, ततः निर्गतेभ्यः तन्तुभ्यः रज्जुनिर्माणकार्यं वा कोल्हुयन्त्रं चालयित्वा नारिकेलतः तैलनिष्कासनकार्यं बन्धकानां शारीरिक-क्षमतां, कारागारे व्यवहारं, कारागारे यापितं कालं च दृष्ट्वा तदाधारेण दीयते स्म।

बारीमहोदयः तस्य अधस्तनः मुख्यः पठाण-नायकः, तदनु पञ्चवर्षतः सुचारु-व्यवहारं यः करोति तादृशः बन्धकः नायकः भवति स्म, पञ्चवर्षाणि नायकरूपेण कार्यं कृत्वा सः कोशाध्यक्षः तदनन्तरं च द्वि-त्रिवर्षानन्तरं टंडेल्रूपेण नियुक्तिः भवति। समग्रं तन्त्रं बन्धकानां कार्यं, शिस्तपालनं, व्यवहारः तदुपरि निर्भरं भवति स्म। तैः च कारागृहस्य व्यवहारः चलति स्म। अनेन प्रकारेण कारावासस्य समग्रा व्यवस्था बन्धकैः सञ्चालिता भवति स्म।

अध्यक्षः कोशाध्यक्षः नायकः वा जाताः बन्धकाः अन्येषाम् अपेक्षया अधिकं विश्रामं कर्तुम् अधिकृताः भवन्ति स्म। अतः ते कारागृहप्रशासनस्य तथा शुभचिन्तकाः भवन्ति स्म येन अन्यान् बन्धकान् शत्रुवत् मन्यन्ते स्म। शत्रुवत् व्यवहरन्ति स्म च। स्व-अधस्तात् स्थितानां बन्धकानां सत्यानृतकथाः अधिकारिणां कर्णयोः प्रापयित्वा तेषां कृपान्विताः भवितुं प्रयत्नं कुर्वन्ति स्म। एतावता न, यदा अधिकारिजनाः बन्धकान् पशुवत् पीडयन्ति तदा पैशाचम् आनन्दम् अपि अनुभवन्ति स्म। अनेन प्रकारेण सेल्युलर-कारागारस्य प्रशासनं बन्धकैः बन्धकानाम् उपरि शासनेन चलति स्म।

भाईपरमानन्दः स्वीयं नूतनं दिनक्रमं व्यवस्थापयति स्म। दिनोदयात् पूर्वमेव घण्टिकारवेण उत्थानं भवति स्म। स्वकक्षे एव नीकः आसीत् तत्रैव लघुशङ्का-शौचादिक्रियाः करोति स्म। बहिः सामुहिकः शौचालयः आसीत् किन्तु बन्धकानां संख्यां तथा च उपलब्धं समयं लक्षीकृत्य सः कक्षे एव निवर्तनीयम् इति योग्यं मन्यते स्म। यत्र निवासः करणीयः तत्र स्वच्छतायाः अपि ध्यानं दत्त्वा शौचकर्म समापयति स्म। तदनु व्यायामेन बहु लाभः भवति इति विश्वासः आसीत् अतः भाईजी व्यायामस्य महत्त्वं स्वीकृत्य दिनचर्यायां तस्य कृते समयं स्थापितवान्।

तत्पश्चात् नायकः, कोशाध्यक्षः च द्वि-चतुर्निमेषाभ्यन्तरं सर्वेषां कक्षाणां तालानि उद्घाटयतः स्म। सर्वान् बन्धकान् पङ्क्त्याम् उपवेश्य गणना भवति स्म। तदनु सर्वान् अधोभागे अवतार्य बन्दीगृहाधिकारि-समक्षं पुनः गणना भवति स्म।

बाष्पिताअक्षताः अपरं नाम 'गञ्जी'इति आसीत् तस्य वितरणं भवति स्म। पश्चात् अनुक्षणम् आदेशः भवति यत् -'अधुना सर्वे स्व-स्वकार्ये व्यापृताः भवन्तु इति।' भाईपरमानन्दसहितं सर्वे बन्धकाः उरुक-युतकानि अवतार्य लघु-अन्तर्वस्त्राणि धारयित्वा नारिकेलस्य वल्कलानां पेषणं कुर्वन्ति स्म। आरम्भस्य ६मासान् यावत् इदं कार्यं कक्षस्य अन्तः एव करणीयं भवति स्म। वल्कलानि प्रतिदिनं निष्पीड्य प्रतिदिनं "पाउण्डद्वय"-परिमितम् अर्थात् अर्धकिलोपरिमितं तन्तुनिर्माणं सरलं न आसीत्। सौष्ठवयुक्तः अनुभववान् बन्धकः त्रिचतुर्होराभ्यन्तरम् इदं कार्यं समापयति स्म। तदपेक्षायां दुर्बलाः नूतन-बन्धकाः ततः द्विगुणं समयं यापयन्ति स्म। दशवादने सर्वेभ्यः किञ्चित् शाकम्, एकचमस-परिमितः सूपः, द्वे लघु-शुष्के रोटिके च भोजनरूपेण दीयते स्म। अध्यक्ष-कोशाध्यक्ष-नायकाः अस्मिन् समये सर्वत्र परिभ्रमणं कुर्वन्ति स्म येन बन्धकाः परस्परं वार्तालापं न कुर्युः। अल्पाति-अल्पेन समयेन भोजनं समाप्य स्वकार्ये निवर्तनं सर्वेषां बन्धकानां कृते अनिवार्यम् आसीत्।

एतत्प्रकारके दिनक्रमे स्थित्वा कारागृहे दिनानि, सप्ताहाः, मासाः, वर्षाणि समग्रं जीवनं च यापनीयं भवति स्म। न च अस्मिन् किमपि परिवर्तनम्! परिवर्तने हि जीवनानन्दः भवति यः कारावासे न कदापि सम्भवः। तथापि जीवनस्य मोहेन

मनुष्यः जीवितं धारयति । येन एतादृश्यां विषम-परिस्थित्याम् अपि बन्धकाः प्रसन्नतया जीवन-यापनाय अभ्यस्ताः भवन्ति स्म ।

रात्रेः दश-द्वादशहोरापरिमितः सेल्युलर्-कारागृहस्य समयः भाईपरमानन्दस्य सर्वतः अभीप्सितः आनन्ददायकः भवति स्म । अन्धकारशून्ये कक्षे एकान्ते रात्रियापने गणमान्याः बन्धकाः अपि भयम् अनुभवन्ति स्म । भाईजी यथा तस्मै रोचते तथा तत्प्रमाणकां निद्रां कर्तुं शक्नोति स्म । अन्येषां बन्धकानां वार्तालापे विचारेषु च तस्य किञ्चिदपि रुचिः नासीत् । एकाकी उपविश्य ध्यानं कृत्वा स्वीय-आत्मिक-उन्नतिप्राप्त्यै सुष्ठु अवसरः भाईजी कृते रात्रौ भवति स्म ।

भाईपरमानन्दस्य समीपे केवलम् एकं पुस्तकम् आसीत् - भगवद्गीता । यदा यदा समयः मिलति तदा गीतापठनं करोति स्म । कतिचिद् दिनाभ्यन्तरं केचन अध्यायाः कण्ठस्थाः भवन्ति स्म । ततः पठनस्य आवश्यकता न भवति । तेषु एकं श्लोकं भाईजी सदा स्मरति यस्मिन् कृष्णः उक्तवान् यत् -

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

भाईजी यथार्थं माया-जालतः मुक्तेः अवसरम् अर्थात् भयानक-अन्धकारमय-रात्रिं स्वीकृतवान् ।

भाईपरमानन्दः रात्रेः अस्मिन् समये स्वजीवने कति मोह-मायारूपाः शृङ्खलाः सन्ति ताः कथं त्रोटयितुं शक्याः तत्-चिन्तनं मननं कर्तुं शक्नोति स्म । सहस्रं बन्धनानि भवन्ति मनुष्यः कति बन्धनानि भिन्द्यात् ? किन्तु कतिचिदेव बन्धनानि भवेयुः चेत् तानि मोचयितुं प्रयत्नः शक्यः । इत्थं कारागृहे बन्धनं भाईजी-कृते मुक्तेः अपरं कारणं जातम् !

एकदा वल्कल-पेषणं समाप्तं तदा एकः भारतीय-बन्धकः भाईजी-समीपम् आगत्य पृष्टवान् - "किं साहेब ! भवान् कुतः अत्र समायातः ?" किञ्चिद् व्यथितः भूत्वा भाईपरमानन्दः उत्तरं दत्तवान् - "न अहमत्र इच्छया समागतः, अपि तु अहं बलात् शृङ्खलया बध्वा अत्र आनीतः ।"

००००००

१४

अमानुषी-व्यवहारे अपि मानवतारक्षणम्

कारावासस्य जीवनसमये मनुष्यव्यवहारस्य विभिन्नपरिमाणानां तलस्पर्शी, अभ्यासः कर्तुम् अवसरः प्राप्यते। कारागृहम् एकः विशिष्टः संसारः अस्ति। अस्य अनुमानं साधारणमानवः न कदापि कर्तुं शक्नोति । भाईपरमानन्दः अपि कारागारविषये श्रुतवान्, कारागृहविषये पुस्तकेषु पठितम् आसीत्, किन्तु स्वानुभवः प्रथमः आसीत्।

देशीयराज्येषु कारागारः अर्थात् बन्धकं पिधाय तस्य स्वतन्त्रता-छेदनम् इत्येव भवति स्म । ब्रिटिश्-सर्वकारे अस्यां परम्परायां परिवर्तनम् आगतम् । ब्रिटिश्-सर्वकारस्य कारागारेषु प्रत्येकेन बन्धकेन किमपि कार्यम् अनिवार्यतया करणीयं भवति स्म । प्रत्येकस्य बन्धकस्य शारीरिकसौष्ठवम् अपराधं च दृष्ट्वा तदनुगुणं कार्यं किं देयमिति निश्चितं भवति स्म ।

भाईजीसमेतं ये राजकीयबन्धकाः आजीवनकारागृहस्य दण्डार्थम् अन्दामानं नीताः तत्पूर्वं सेल्युलर्-कारागृहे अनेके राजकीय-बन्धकाः विद्यमानाः आसन् । बङ्गालस्य माणेकटोला षड्यन्त्रस्य बन्धकः, महाराष्ट्रस्य सावरकर-बान्धवौ, पञ्जाबोत्तरप्रदेशयोः 'स्वराज'नामक-वर्तमानपत्रस्य सम्पादकः अपि कारावासे आसीत् ।

अनुभविनः राजकीय-बन्धकाः पुरातनाः रसप्रदाः साहसिकाः च सेल्युलर्-कारागृहस्य घटनाः परमानन्दाय श्रावितवन्तः । परस्परं गुप्तचराणां दृष्टिः, कार्यं विना वार्तालापः प्रतिबन्धः आसीत् तथापि बङ्गालस्य नवयुवकः मणिगोपालः मासत्रयं यावत् अनशनं कृतवान् सा घटना ज्ञानपथम् आगता । मणिगोपालः मासत्रयं यावत् स्वकक्षे भूमौ अभुक्त्वा, वस्त्राणि अधारयित्वा स्वपिति स्म ।

भाईपरमानन्दसमेतं नवागन्तुकबन्धकान् परितः चत्वारः व्यवस्थिताः । सेल्युलर्-कारागारस्य अघोषितः नियमः आसीत् यत् कस्य अपि बन्धकस्य परिवादकथा कारागृहाधिकारिसमक्षं भवेत् तर्हि यदि सः अपराधी जनः स्व-

अपराधः नास्ति इति प्रमाणयितुं न शक्नोति चेत् विना प्रमाणेन हि सः अपराधः अस्ति इति स्वीक्रियते स्म ।

कारगृहस्य प्रथमदिने एव गुप्तचराः अनृतां सूचनां दत्तवन्तः । भाईजीसमेतं सर्वे 'कारागृहेश्वरस्य' कारागृहस्वामि-बारीसाहेबजी पुरतः उपस्थापिताः । बारीमहोदयः सूचना-दानम् आरब्धवान् - "बाबा अयं कारावासः । इदम् आजीवनकारागृहस्थानम् । अत्र यत्कार्यं दत्तं भवेत् तत् केनापि मूल्येन समापनीयं भवत्येव ।"

बन्धकेषु भाईपरमानन्दस्य समान-नामधारी अन्यः परमानन्दः अपि आसीत् । दुर्बलः अयं युवकः बारीसाहेबसमक्षं शिथिलः भूत्वा स्थितः आसीत् । बारीमहोदयः क्रुद्धः भूत्वा गर्जितवान् - "सावधानः तिष्ठ ।" नायकः परमानन्द-समीपम् आगत्य सावधान-स्थितेः शिक्षां दत्तवान् । बारीमहोदयः प्रथमदिनम् आसीत् अतः सर्वान् सूचनां दत्त्वा मोचितवान् ।

द्वितीयदिने रविवासरः आसीत् । अवकाशस्य दिने सर्वे बन्धकाः स्ववस्त्राणि प्रक्षालयन्ति स्म । अयं नित्यक्रमः आसीत् । प्रातराशे पानार्थं 'गञ्जी'पेयं तस्मिन् दिने न दीयते स्म । दशवादने भोजनानन्तरं सर्वेषां गणनां कृत्वा पुनः कक्षे पिहिताः क्रियन्ते स्म । इत्थमेव गणना रात्रिभोजनतः पूर्वं भवति स्म । अवकाशे एकान्तवासे शून्यमनस्कं विना अन्या का प्रवृत्तिः भवितुं शक्या ।

अपरदिने कार्यार्थं गमनसमये सः दुर्बलः परमानन्दः कार्यार्थं गमनाय न इति उक्तवान् । नायकयुवकः परमानन्दम् उत्तोल्य बारीमहोदयस्य पुरतः नीतवान् । कारागृहस्वामी अतिक्रुद्धः जातः अतः परमानन्दः अपि यथातथम् अनुचितं भाषितवान् । घटना अति-उग्रा जाता, कारागृहस्वामी-आसन्देन परमानन्दस्य उपरि आक्रमणस्य भर्त्सनं (धमकी) दत्तवान् अतः परमानन्दः उत्प्लुत्य कारागृहस्वामिनं धर्षणं (धक्का) दत्तवान् । कारागृहाधिकारी असन्तुलितः भूत्वा आसन्दस्य उपरि पतितः ततः भूमौ निपतितः ! अस्तु ! कारागृहस्य परमेश्वरस्य बारीमहोदयस्य उपरि आक्रमणस्य अयं समाचारः वायुवेगेन प्रसृतः ।

नायकाः उपनायकाः परमानन्दस्य उपरि आक्रमणं कृतवन्तः । मस्तकं भग्नम् अतः परमानन्दः रक्तरंजितः जातः तस्य स्थितिः गम्भीरा जाता । सेल्युलर्-

कारागृहस्य अधीक्षकः यः सज्जनः समदर्शी च आसीत्, तस्य समक्षं समग्रः वृत्तान्तः प्राप्तः। अन्ततः नवयुवकाय ३०कषाघातस्य दण्डः आज्ञापितः।

बारीमहोदयः स्वस्योपरि जातस्य आक्रमणस्य प्रतिशोधं नेतुम् अधीरः आसीत्। कारागृहे सुखस्य इच्छा भोजनस्य लालसा इति द्वयमपि अमोघं प्रलोभनम् आसीत्। येन किमपि कार्यं साधयितुं शक्यम् आसीत्।

बन्धकानां मध्ये भेदः, परस्परं वैमनस्य-जननम्, अनृतानाम् अभियोगानां कर्णोपकर्णकथाः कृत्वा रोषजननम् इत्यादिषु कार्येषु बारीमहोदयः तस्य चाटुकाराः नायकाः, कोशाध्यक्षाः च निपुणाः आसन्।

बन्धकानां मध्ये जायमानप्रवृत्तितः भाईपरमानन्दः पूर्णतया उदासीनः तिष्ठति स्म। प्रातिदैनिकान् कलह-प्रसङ्गान् भाईपरमानन्दः दर्शकरूपेण पश्यति स्म। भाईपरमानन्दस्य कृते निकृष्टं भोजनम्, अन्ये प्रतिबन्धाः सह्याः आसन्। केवलम् असह्यमासीत् प्रतिक्षणं क्रियमाणम् अवमाननम्!

भाईपरमानन्दः शारीरिककष्टानां दुष्टुभोजनव्यवस्थाया मध्ये अपि सततं चिन्तनं करोति स्म। सः चिन्तयति स्म यत् सेल्युलर् कारागृहे एकत्र द्रोहः अस्ति चेत् अपरत्र मूर्खता। उभयोः कतमत् कार्यम् अधिकम् अयोग्यम्? दीर्घचिन्तनानन्तरं भाईजी इदं निष्कर्षं प्राप्तवान् यत् द्वयमपि अयोग्यं भयानकमिति। एकः हृदयस्य दोषः अपरः मस्तिष्कस्य दोषः!

भाईपरमानन्दः अनुभवति स्म यत् मस्तिष्कदोषः कदाचित् क्षन्तुं योग्यः भवेत् किन्तु हृदयस्य दोषः अर्थात् स्वार्थवशात् अन्येषां विश्वासघातः न कदापि क्षमाजन्यः इति।

भाईपरमानन्दः कारागारस्य कूटनीतितः दूरे तिष्ठति स्म, अतः केचन मूर्खबन्धकाः तं कातरं मत्वा क्रोधेन किमपि किमपि वदन्ति स्म। भाईजी स्पष्टः आसीत् यत् यः बन्धकः घोरकष्टानि सहर्षं स्वीकरोति सः अधिकः उदारचरितः अस्ति। सुष्ठुभोजनं लभेत तदर्थं किमपि सिद्धान्तविरुद्धं वा कूटनीतियुतं करोति सः उदात्तचरितः कथं कथयितुं योग्यः?

यस्य रोमसु मानवता विद्यमाना आसीत् तादृशः भाईपरमानन्दः सेल्युलर्-कारगृहस्य मानवतारहिते वायुमण्डले त्रस्तः भवति स्म । स्वात्मानं प्रसादयति स्म च । भाईजी इदं स्वीकृतवान् यत् परितः ये अधमजनाः सन्ति तैः सह अनिवार्यतया सङ्गः आपतितः चेत् तैः सह जीवनयापनम् अनिवार्यम् अस्ति । केवलं तेषामेव बन्धकानां कृते सहानुभूतिः शक्या आसीत् येषां मनः स्वच्छम् आसीत् । यातनानां मध्ये अपि मानवीयसद्गुणग्राहकः भाईपरमानन्दस्य महत्ता ।

oooooo

१५

महायुद्धदर्शनस्य महेच्छा

सेल्युलर्-कारावासे नियन्त्रणानां कष्टानां कारणेन सर्वेषां बन्धकानां मानसिकता तत्रत्यानाम् अधिकारिणां विरुद्धमेव भवति स्म। सर्वे मनसा त्रस्ताः आसन् तथापि राजकीयबन्धकान् प्रति अन्येषाम् बन्धकानां सहानुभूतिः आसीत्।

मनुष्यस्य स्वभावः अस्ति यत् तस्य या इच्छा भवति तस्य उपरि सः शीघ्रं विश्वासं करोति। सर्वे बन्धकाः इच्छन्ति स्म यत् आजीवनकारावासीययातनातः मुक्तिप्राप्तिः भवेत् इति ! अतः भारतस्य स्वतन्त्रतायै पुरुषार्थं साहसं च ये कुर्वन्ति तान् प्रति मानं दर्शयन्ति स्म।

ब्रह्मदेशनिवासी एकः वृद्धः बन्धकः ३०वर्षेभ्यः अन्दामाने पीडितः निवसति स्म। महत्या आशया एकदा भाईपरमानन्द समीपं गत्वा अवदत्-"किं महाशय ! आङ्ग्लाः गमिष्यन्ति इति सत्यं वा ?" भाईजी उत्तरं दत्तवान् -"भवान् एव कथयतु।" सः उक्तवान् - "अहं तु मन्ये यत् सर्वे बन्धकाः अनृतं वदन्ति। अहं त्रिंशत्-वर्षतः पूर्वम् अत्र आगतः तदा अपि अत्र सर्वे एवं वदन्ति स्म यत् आङ्ग्लाः गमिष्यन्ति इति।" वास्तविकतया अनेन विश्वासेन हि आजीवन-बन्धकाः स्वजीवनं यापयितुं समर्थाः भवन्ति स्म।

सेल्युलर्-कारागारः यदि एकं दुर्जनं नियंत्रितं कृत्वा सज्जनं कुर्यात् चेत् तस्य प्रयोजनं सिद्धं भवेत् किन्तु अयं कारागारः एकं पञ्जरं न आसीत् अपि तु तादृशं दुरितं, दुर्गन्धितं स्थानम् आसीत् यत्रत्यः जल-वायू, वार्तालापः, विचाराणां तरङ्गाः, चेष्टाः तं नरकस्य पर्यायरूपं भावयति स्म।

इत्थं नैराश्यपूर्णं भविष्यं, कारागृहस्य विवधदण्डानां कठोरता, कठिनतया कार्याणां प्रवृत्तिः इत्यादिभिः बहवः बन्धकाः निराशाः भूत्वा आत्मघाताय निश्चयं कुर्वन्ति स्म।

प्रतिदिनं सायङ्काले परीक्षणं भवति स्म तथा च नायकः आरात्रि हस्ते दीपं नीत्वा भ्रमति स्म। तथापि रज्ज्वाः खण्डाः सङ्गोप्य नेयाः तदपेक्षया युतकं लघु-

अन्तर्वस्त्रं त्रोटयित्वा तस्मात् रज्जुनिर्माणं क्रियते स्म। तादृश-रज्ज्वाः एकः अन्तः गवाक्षस्य जालक-दण्डेन सह बध्वा अपरम् भागं ग्रीवायां ग्रन्थिं कृत्वा बध्यते स्म। तस्य आधारेण बन्धकः आलम्बितः भूत्वा कतिचित् क्षणानन्तरं मृत्युं प्राप्नोति स्म!

भाईपरमानन्दस्य सेल्युलर्-कारागृहे निवासकाले एतादृश्यः आत्मघातस्य बह्व्यः घटनाः अभवन्। इमाः घटनाः भाईपरमानन्दस्य हृदयं प्रभावितं कुर्वन्ति स्म सः चिन्तयति स्म यत् इदं बन्दीगृहं तादृशं स्थानम् अभवत् यत्र जीवनं मृत्युः च द्वयोः अपि निकटता अनुभवितुं शक्यते।

भाईजी बन्धकानां मनोभूमिकायाः सन्ततम् अभ्यासं करोति स्म। भाईपरमानन्दः मन्यते स्म यत् यत्र किमपि वस्तु प्राप्तव्यं न भवेत् तत्र कस्यापि वस्तुनः प्राप्तेः इच्छा मनसि धारणेन व्यक्तिः स्वात्मानमेव सङ्कटे पातयति। इच्छाम् एव न निदध्मः चेत् एव आवश्यकतानां पूर्तिः शक्या।

अस्यां मनोदशायां स्थितस्य मनुष्यस्य समीपे विकल्पद्वयमेव भवति इति भाईपरमानन्दस्य सुविचारितं मतम्। प्रथमः विकल्पः मनसि महेच्छानां मोदक-विकासः विधेयः। आवश्यकतानां कल्पनाविस्तारेण सह स्वहृदयस्य दुःखस्य अपि वृद्धिः कार्या। अपरः विकल्पः सः आसीत् यत् स्वस्य इच्छाः एव दूरीकर्तव्याः। सामान्यतया यत् वस्तु अप्राप्यं भवेत् तस्य कृते बालकवत् लोभः जागृतः भवति।

भाईपरमानन्दः विरलं व्यक्तित्वं धारयति स्म। सः किञ्चित् अभ्यासेन हिन्दुबौद्धधर्मस्य इमां सत्यतां ज्ञातवान् यत् केन प्रकारेण तृष्णां मारयित्वा एव वयं निःसीमम् आनन्दं प्राप्तुं शक्नुमः।

चोरः भवेत् वा भयानकः लुण्टाकः, साधुवेशेन लुण्ठनं कर्ता विद्रोहिजनः वा राजकीयः बन्धकः च सर्वेषां विचारेषु व्यवहारेषु भिन्नत्वे अपि सेल्युलर्-कारागृहवासिनः प्रत्येकस्य बन्धकस्य हृदये एकाम् इच्छां भाईपरमानन्दः समानतया अन्वभवत्। सा इच्छा आसीत् - एकवारं स्वदेशदर्शनस्य!

भाईजी मानसिकतया उट्टङ्कितवान् यत् मनुष्यः स्वदेशं प्रति प्रेम अपि तदैव धारयति यदा सः देशतः वियुक्तः क्रियते। यथा मनुष्यः दुःखी भवति तदा एव सुखस्य महत्त्वं जानाति तथैव देशनिष्कासनात् पश्चात् एव देशस्मृतिः हृदये उत्पद्यत।

गाढनिद्रायाम् अपि अनेके बन्धकाः वदन्ति स्म यत् – "हे परमेश्वर ! एकवारं तु अस्मां स्वदेशस्य मृत्तिकादर्शनाय अवसरं ददातु !"

भाईपरमानन्दः सेल्युलर्–बन्दीगृहस्य अस्मिन् वातावरणे दिनानि यापयति स्म। विश्वयुद्धस्य प्रारम्भतः एव भाईजी प्रत्यक्षरूपेण युद्धं द्रष्टुं तीव्रतया इच्छति स्म। अस्याः इच्छाया पूर्तिः तु अन्दामान–गमनेन एव अशक्या अभवत्। किन्तु राजकीय–बन्धकानाम् उपरि एका कृपा जाता आसीत् यत् लंडनस्य 'टाइम्स्'वृत्तपत्रस्य साप्ताहिक–आवृत्तिः पठनार्थं दीयते स्म।

विश्वयुद्ध–सदृशाः अति महत्त्वपूर्णाः समाचाराः ज्ञातुं लब्धाः अतः भाईजी अदम्यम् उत्साहम् अन्वभवत्। विश्वयुद्ध–समये भारते जायमानानां घटनानां ज्ञानं न देयम् इति सेल्युलर्–कारागृहस्य नियमः आसीत्। भारत–विषयकः कोऽपि समाचारः प्राप्तः न भवेत् तादृशी सुदृढा व्यवस्था आसीत् तथापि शीघ्रतया विलम्बेन वा अर्ध–पूर्णमात्रायां समाचारः सेल्युलर्–कारागृहे प्राप्तः भवति स्म एव।

जीवने विश्वयुद्धदर्शनस्य भाईपरमानन्दस्य एका एव लालसा आसीत्। इदं युद्धं मानव–इतिहासस्य अभूतपूर्वम् इति सः मन्यते स्म। भाईजी इदं जानाति स्म यत् महाभारतस्य युद्धे विश्वस्य सर्वे नृपाः एकस्मिन् अपरस्मिन् वा पक्षे भागं गृहीतवन्तः। एषा कथा पुरातना आसीत् तदानीं संसारे मानवसमुदायः अपि न्यूनः आसीत्।

भाईपरमानन्दस्य विश्वयुद्धविषयकं विश्लेषणं रसपूर्णम् आसीत्। विश्वयुद्धस्य समये –संसारे यदा मानवः एकैकस्य भूमिकणस्य उपरि एव न अपि तु जल–वाय्वोः उपरि अपि स्वप्रभुत्व–स्थापनाय प्रयत्नं कृतवान् तस्याम् अवस्थायां प्रगतिशीलानां जातीनां परस्परं सङ्घर्षः भवेत् चेत् समग्रः संसारः तस्मिन् सम्मिलितः भवेत् इति आवश्यकमेव। इति भाईजी मन्यते स्म।

युरोपस्य जातीनाम् एकमेव लक्ष्यम् आसीत् यत् केनापि भोगेन अन्येषां धनसम्पत्तिः लुण्ठयित्वा स्वजातिः अग्रे वर्धनीया। कतिचन जातयः अस्यां विकासस्पर्धायाम् अग्रे निःसृताः। जर्मन् देशस्य पीडा आसीत् यत् सः अग्रे वर्धितुं न शक्तः। जर्मन् जनानां मनसि संसारे विजयं प्राप्य स्वस्थानं स्थापयितुम् इच्छा

जागृता। तस्य प्रतिकारं कर्तुम् इंग्लैण्ड-आदिदेशा: आत्मनिर्णयस्य जाति-स्वतन्त्रताया: च सिद्धान्तं प्रस्तुत्य सङ्घर्षस्य प्रारम्भ: अस्य सिद्धान्तस्य उपरि उपस्थापित: इति भाईपरमानन्दस्य मतम् आसीत्।

महायुद्धस्य समाप्ति: जाता। विश्वस्य मानचित्रे लघुपरिवर्तनानि विहाय न किमपि बृहत्परिवर्तनं जातम्। भाईपरमानन्द: तथा मन्तुम् आरब्धवान् यत् युद्धस्य परिणामस्वरूपं केवलम् उल्लेखनीयं परिवर्तनं जातम्। यस्य प्रभाव: संसारस्य भविष्ये संभवत: दृग्गोचरी भविष्यति। स: अस्ति रूसदेशस्य क्रान्ति: तत्र साम्यवादस्य प्रचार: प्रसारश्च।

विश्वयुद्धे इंग्लैण्ड्देश: एकपक्षे आसीत्। इंग्लेण्ड: भीषणयुद्धस्य अनुभवं कृतवान्। विजय: प्राप्त: तथापि युद्धसमये इंग्लेण्ड-विरुद्धं सबल: प्रतिकार: दृष्ट: अत: भारताय आङ्ग्लशासनद्वारा कश्चित् लाभ: भविष्यति, भारतस्य प्रशासने काचित् सुधारणा भविष्यति इति आशाकिरणानि दृष्टानि।

सेल्युलर्-कारावासे युद्धसमाप्ते: घोषणा जाता यत् राजकीय-बन्धकान् विहाय अन्येषां बन्धकानां प्रतिवर्षं मासैकस्य दण्डस्य क्षमा घोषिता अभवत्। राजकीय-बन्धकानां विषये विचारणा चलति इति उक्तं तेन आशा जनिता।

'रोलेट्-एक्ट्'-तद्विरुद्धम् आन्दोलनं समग्रे देशे अभवत् इति समाचारेण आशा धूसरिता अभवत्। पञ्जाबे महाऽऽन्दोलनस्य समाचार: प्राप्त:। पञ्जाबस्य मुख्य-वाक्कीलानां प्रग्रहणं जातम् इति श्रुतम्। अनेकेषु स्थानेषु सैनिक-शासनं स्थापितम्। सैनिक-शासन-अन्तर्गतं त्रिंशत् बन्धकानां दलम् अन्दामानम् आनीतम्।

एते बन्धका: अमृतसर-लाहोर-गुजरानवाला-वजीराबाद-इत्यादिस्थानानां घटना: ज्ञापितवन्त:। आन्दोलनै: जनजागृति: उत्पन्ना इति भासते स्म किन्तु आङ्ग्लशासनम् इमाम् आभासिनीजागृतिं निष्पीडयितुं तत्परम् आसीत्।

अनेन भाईजी अन्वभवत् यत् अधुना तस्य शेषं जीवनं सेल्युलर्-कारागृहे एव गमिष्यति इति!

ooooooo

१६

मृत्यवे सज्जता - लब्धा मुक्तिः

भाईपरमानन्दस्य मनसि व्याकुलता समुद्भूता। वारंवारं सः चिन्तयति स्म यत् अधिकं जीवितव्यं वा जीवनस्य अन्तः कर्तव्यः ? कारागारस्य बन्धने स्थित्वा जीवन-यावनेन वस्तुतः तस्य जीवनं प्रति अनुचितः मोहः अस्ति इति प्रकटितं भवति स्म। महायुद्धस्य नाटकं द्रष्टुं जीवनाय इच्छा आसीत्। किन्तु विश्वयुद्धस्य खेलः समाप्तः अभवत् अतः भाईजी जीवनं प्रति मोहतः मुक्तिम् इच्छति स्म।

सैनिक-शासनान्तर्गतम् अत्याचाराणाम् सत्यशोधनाय एषा समितिः निर्मिता आसीत् तस्याः समक्षं सत्यभाषी आङ्ग्ल-सेनानायकः 'डायरः' तथ्यानि यथार्थतया ज्ञापितवान्। अतः इंग्लैण्डमध्ये कोलाहलः अभवत्। बलप्रयोगस्य दमनस्य च एका सीमा भवति। पञ्जाबे 'सरमाईकल-ओडवायर्'द्वारा या छविः उत्पादिता यत् तस्य कठोर-व्यवस्थापनेन पञ्जाबस्य जनाः राजभक्ताः आज्ञाङ्किताः च भाविताः सा छविः 'जनरल्-डायरस्य' तत्त्वनिवेदनेन धूलिमिश्रिता अभवत्। भयेन शासनं कीदृशं कियत् च चलेत् ?

पञ्जाबे यः घटनाक्रमः चलितः तेन एव प्रकारेण सेल्युलर्-कारागृहे भाईपरमानन्दम् अनुलक्ष्य एका घटना घटिता। अन्दामानस्य शासनं मुख्यायुक्तः(कमिश्नर) चालयति स्म। भाईजी कारावासे आसीत् तदा सेनाध्यक्षः(जनरल)'डग्लस्' इदं पदं वहति स्म। 'जनरल्-डग्लस्' पञ्जाबे सह-मुख्यायुक्तरूपेण आसीत्। सः 'सर-माईकल्-ओडवायरस्य' परममित्रम् आसीत्। 'जनरल्-डग्लस्' मासत्रयस्य अवकाशं स्वीकृत्य लंडनं गतः अतः अधिकारिणे मरेवर्याय कार्यभारः दत्तः आसीत्। श्रीमरेवर्यः भाईजीं प्रति सद्भावं धारयति स्म। अतः कठोर-परिश्रमस्य स्थाने भाईपरमानन्दाय चिकित्सालयस्य परिचारकरूपेण कार्यं दत्तम्।

लंडनतः प्रतिनिवर्तनसमये कारागृहम् अभ्यागतः तदा मुख्यायुक्तः 'जनरल्-डग्लस्' भाईपरमानन्दं चिकित्सालये दृष्ट्वा क्रोधाविष्टः अभवत्। तस्य अनुमतिं

विना भाईपरमानन्दाय परिचारकस्य कार्यं दत्तम् अतः सः अतीव क्रुद्धः अभवत्।

श्रीमरेवर्यः अवकाशे लंडनं गतः। तदानीं भाईपरमानन्दः स्वमित्राणि उद्दिश्य यानि पत्राणि लिखित्वा पञ्जाबं प्रेषितवान् ततः किञ्चित् सामग्रीं विभाव्य एकः लेखः पञ्जाबस्य 'ट्रिब्युन्'वृत्तपत्रे प्रकाशितः। मुख्यायुक्तः ज्ञापितः सन् कारागृहाधिकारी, नायकाः अध्यक्षादयः आगत्य भाईपरमानन्दस्य परीक्षणं कृतवन्तः। ततः भाईपरमानन्दाय बन्दीगृहे निवसनस्य दण्डः आज्ञापितः। अस्याः घटनायाः पूर्वमेव भाईपरमानन्दस्य मनसि मृत्युविषयकाः विचाराः आगच्छन्ति स्म। अधुना सः निश्चयम् अकरोत् यत् संभवतः समयः आगतः अस्ति यत् मया मम पुरातनः सङ्कल्पः पूरणीयः इति।

भाईपरमानन्दस्य सङ्कल्पः आसीत् यत् भोजनपानादिकं त्यक्त्वा स्वजीवनलीला समापनीया इति। कमपि भाययितुं तर्जयितुं वा एषः निर्णयः न आसीत्। अधुना अधिक-जीवनस्य आवश्यकता नास्ति इति भाईजी मन्यते स्म। सप्तदिनानि यावत् कक्षे विना अशन-पानेन निवासं कृतवान्। प्रथमं दिनद्वयं तु शरीरे तीव्रवेदना दौर्बल्यं च अनुभूतम्। भाईजी अन्वभवत् यत् शरीरात् किमपि निर्गच्छति इति।

भाईपरमानन्दस्य ध्याने आगतं यत् यदा मनुष्यः एकं सङ्कल्पं करोति यत् सः जीवितुं न इच्छति तदा सर्वाणि दुःखानि पीडाः तृणवत् भवन्ति। भाईजी उपवासस्य समयमुपलक्ष्य एकं काव्यपदं स्मृतवान् -

जिन्दगी अपना फसाना है जमो के लिये
गुम हुए हैं हम यहाँ से याद आने के लिये।
मर गये लेकिन जमीं पर नाम पैदा कर गये
जान जाने के लिये है मौत आने के लिये।

कतिचिद् दिनानन्तरं समाचारः आगतः यत् नृपः घोषितवान् अस्ति यत् सर्वे राजकीय-बन्धकाः मोक्तव्याः इति। सर्वे भाईपरमानन्दम् उपवासं मोक्तुं प्रार्थितवन्तः। किन्तु भाईपरमानन्दस्य उत्तरम् आसीत् - "अहं हास्यास्पदः भवितुं न इच्छामि इति। जीवनं मृत्युः वा शिशुक्रीडा नास्ति। यदि तथैव स्यात् तर्हि एतानि

दिनानि विना अशनपानेन अपि अहं जीवितः भवेयम् ।"

कारागारस्य नियमानुसारं सप्ताष्टदिनानन्तरं चिकित्सकः निदानार्थम् आगतः । हस्त-पादौ गृहीत्वा जतु नलिकां नासिकायां निक्षिप्य दुग्धं दत्तम् । अनया प्रक्रियया भाईजी अतिकष्टम् अनुभवति स्म । अष्टसप्ताहान् यावत् अयं क्रमः चलितः ! एतत् मासद्वयं यावत् भाईपरमानन्दस्य मनः संसारतः सर्वथा विमुखम् स्थितम् ।

प्रारम्भस्य मासैक-द्वयं निलम्बन-कक्षे, अधुना च मृत्योः सज्जतायां समय-यापने भाईजी असीमम् आनन्दम् अन्वभवत् । अयम् आनन्दः उत्साहः च समरसौ अभवताम् । मनसि न कोऽपि विकारः उत्पद्यते स्म । संसारस्य सर्वाः चिन्ताः, प्रधर्षणाः पृष्ठे अवशिष्टाः भासन्ते स्म । भाईपरमानन्दः स्वात्मानं सर्वतः अतीव दूरे अनुभवति स्म । तस्य समग्रं ध्यानम् एकस्मिन् एव तथ्ये केन्द्रितम् आसीत् -मृत्युः ।

नूतनः अधीक्षकः भाईपरमानन्दं वारंवारं मेलितुम् आगच्छति स्म तं वारयितुं प्रयत्नं करोति स्म । कथयति स्म यत् आत्मघातः पापम् अस्ति इति । भाईजी उत्तरं ददाति स्म यत् आत्महत्या तदैव भवति यदा मनुष्यः स्वतन्त्रतया जीवति तथा च स्व-उन्नत्यर्थं वा कर्तव्यपालनार्थम् अवसरः स्वतन्त्रता वा तस्मै प्राप्ता भवेत् । यत् तथ्यं बहिस्तन-संसारस्य कृते पापं पुण्यं वा अस्ति तत् कारागृहस्य जीवनाय पापं पुण्यं वा गणयितुं न शक्यते । एवमपि भाईपरमानन्दः आर्यसमाजस्य प्रबल-प्रचारकः आसीत् आर्यसंस्कृतौ शरीरत्यागः पापं न गण्यते ।

एकदा अधीक्षकः भाईपरमानन्दं मेलितुम् आगतः तदा सैनिकशासनस्य बन्धकानाम् अन्येषां चतुर्णां बङ्गालीबन्धकानां मुक्तेः सूचनां यच्छन् अवदत् यत्, "त्वया अधुना उपवासः न कर्तव्यः । बहवः बन्धकाः मुक्तिं प्राप्तवन्तः प्रायः तव नाम्ना अपि आदेशः आगतः स्यात् । यदि त्वम् अस्याम् अवस्थायां स्थास्यसि चेत् तव परावर्तनं संभवं न भविष्यति ।"

भाईपरमानन्दः अस्मिन् वाक्ये स्पष्टः सङ्केतः अस्ति इति ज्ञातवान् । अतः सः उचितं मतवान् यत् यदि अवसरः मिलति चेत् अस्मात् शरीरात् पुनः किमपि

सत्कार्यं कारणीयम् । अन्ते भाईजी अनशनं त्यक्तवान् !

एकदा प्रातः भाईपरमानन्दः अधः अवतीर्णः तदा नायकः तम् आह्वयितुम् आगतः । भाईपरमान्देन सह उपरान्तं चतुर्दश-बन्धकाः द्वारसम्मुखं स्थिताः । अधीक्षकः, अधिकारी च हस्ते पत्राणि नीत्वा आगतौ । भाईजीं सम्बोधयन् अधिकारी अवदत् यत् - "त्वम् एतान् पञ्जाबीभाषायां ज्ञापय यत् पञ्जाब-सर्वकारेण कैश्चित् समयैः सह सर्वेषां मुक्तेः स्वीकृतिः दत्ता अस्ति । यदि समयाः स्वीकृताः सन्ति चेत् वचनं देहि यत् समयपालनं करिष्यसि इति ।"

समयाः आसन् :- १) सर्वकारविरुद्धं किमपि न करणीयम् २) यावत् पञ्जाबसर्वकारः पूर्णरूपेण स्वतन्त्रतां न ददाति तावत् उपमुख्यायुक्तस्य अनुमतिं विना जनपदतः बहिः न गन्तव्यम् ३) यदि एतेषां समयानां पालनं न क्रियते चेत् पुनः अवशिष्टः दण्डः सोढव्यः भविष्यति । भाईपरमानन्दस्य पत्रे एकः अधिकः समयः आसीत् यत् - भाईजी कमपि 'गद्दर' वा अन्यस्मै विद्रोहिदलाय साहाय्यं न करिष्यति इति ।

भाईपरमानन्दः अस्याः प्रतिज्ञायाः स्वीकारे न कापि बाधां ज्ञातवान् कारणं सः पूर्वतः एव कस्मिन्नपि दले सक्रियः भवितुं वा सहयोगं दातुं न इच्छति स्म ।

सर्वे स-बन्धकाः समाचारं ज्ञातवन्तः । सर्वे मेलितुम् आगतवन्तः । सर्वेषां मुखे प्रसन्नता हर्षः च ज्ञायते स्म । किन्तु भाईपरमानन्दस्य मनसः अवस्था किञ्चिद् भिन्ना आसीत् । अस्य नूतनजन्मनः विषये चिन्तनं कुर्वन् सः अन्वभवत् यत् मानवस्य अयं स्वभावः अस्ति यत् सः पुरातनान् परिचितान् मिलित्वा विशेषम् आनन्दम् अनुभवति । सर्वदा तस्य सा इच्छा भवति यत् सः यत्र उषितः तानि स्थानानि गच्छेत्, परिचित-जनान् मिलित्वा तैः सह वार्तालापं कुर्यात् । एतेषां सम्बन्धानां वियोगः दुःखदायी भवति तथा च तेषां पुनः प्राप्तेः अवसरः न केवलं नूतनं जीवनम् अपि तु अनेकैः सुखैः सह लब्धं नवजीवनम् अस्ति इति भाईपरमानन्दः मन्यते स्म ।

भाईपरमानन्दस्य मनसि एकस्य तथ्यस्य दुःखमपि आसीत् । इतः परं तेषां

जनानां वियोगः भविष्यति यैः सह किञ्चित् कालपर्यन्तं सः जीवनं – मृत्युः, दुःखं – सुखं, तथा आशा –निराशा इत्यादिद्वन्द्वेषु सहभागितां निरूढवान्। कारागृहस्य कक्षाः, भित्तयः तत्र निवसतां बन्धकानां विदायसमये भाईपरमानन्दस्य हृदयं भावभरितं जातम् !!

०००००

१७

स्वदेशागमनम्

'महाराजा'नामकं जलपोतं यस्मिन् भाईजीसमेतम् अन्ये बन्धकाः अन्दामानम् आनीताः आसन् तेन एव जलपोतेन चेन्नै गन्तुं दिनद्वयानन्तरं प्रस्थिताः । जलपोते अन्ये बन्धकाः तदुपरान्तं स्थानिकापणिकाः भाईपरमानन्दं न दृष्टवन्तः ते भाईजी समीपम् आगत्य तं दृष्ट्वा हस्तद्वयेन नमस्कृत्य गच्छन्ति स्म । एते आपणिकाः जलपोतस्य उपरि दानम् एकत्रितं कृत्वा भाईजीकृते धौतानि, युतकानि, शिरोवेष्टानि, फलकण्डोलान् च प्रापितवन्तः !!

दिनत्रयस्य यात्रानन्तरम् अन्दामान-रक्षकाः सर्वेषां बन्धकानां दायित्वं चेन्नै-रक्षकेभ्यः दत्तवन्तः । रात्रौ एकस्मिन् आरक्षकागारे भोजनं जातम् । तत्रैव रात्रिवासं कृतवन्तः । द्वितीयदिने आरक्षकायुक्तस्य कार्यालये उपस्थापिताः । तृतीयदिने आरक्षकाध्यक्षः लाहोरामृतसरयोः तृतीयकक्षीयां चिटिकां क्रीत्वा सर्वेभ्यः दत्तवान् ।

मुम्बई-मध्यप्रदेश-संयुक्तप्रान्त-दिल्ली-पञ्जाबादिविस्तारतः भाईपरमानन्दः यात्रां कृतवान् । प्रत्येके रेलस्थानके आरक्षकाः आगच्छन्ति स्म । गणनां कृत्वा आवश्यकीं भोजनव्यवस्थां कृत्वा गच्छन्ति स्म । षट्-दिनानां दीर्घयात्रा अनेकासां यातनानां मध्ये समुत्तीर्णा । यद्यपि अन्दामानस्य यातनां भुक्तवतां कृते एताः यातनाः नगण्या एव भवन्ति खलु ?!

भाईपरमानन्दस्य अनेके सहयात्रिकाः लुधियाना वा अमृतसर-स्थानके अवतीर्णाः । रेलयानं लाहोर स्थानकम् आगतम् । स्वकम्बलं वस्त्राणां पोटलिकां च नीत्वा अवतरणाय सज्जस्य भाईपरमानन्दस्य दृष्टिः रेलयानतः बहिः गता । एकं परिचितं गुप्तचरं दृष्टवान् । भाईजी अवगतवान् । सः तम् आहूय पृष्टवान् – "अद्य कम् अन्विष्यति भवान् ?" सः आरक्षकः स्वरं विज्ञाय अवदत् – "अरे ! भवान् तु परिज्ञातुम् असम्भवः अस्ति !" भाईजी प्रत्युत्तरं दत्तवान् – "तादृश-स्थानतः एव आगच्छामि खलु ?"

गुप्तचरः भाईपरमानन्दम् उपायुक्तसमीपं नीतवान् । भाईपरमानन्दं पृष्टवन्तः

"अद्य कुत्र गमिष्यसि ?" भाईपरमानन्दः उत्तरं दत्तवान् – "मम पत्नी अत्रैव निवसति। सङ्केतं पृच्छन् तत्रैव गमिष्यामि। यदि भवन्तः जानन्ति चेत् तत्र यावत् प्रापयन्तु इति।" "वयं न जानीमः।" उत्तरं लब्धम्।

रेलस्थानकतः बहिः निर्गत्य रथेन 'लोहारी-दरवाजा'पर्यन्तं भाईजी समागतः। बाहुमूले कम्बलस्य पोटलिकां नीत्वा अवाचकः भूत्वा स्थितः। कुत्र गच्छानि ? मनसि प्रश्नः उद्भूतः – इदं किं स्वप्नं तु नास्ति खलु ? नेत्रयोः पुरतः भूतकालस्य प्रसङ्गानां चित्राणि प्रत्यावर्तन्ते स्म। मनसि कीदृशाः भावाः आसन्! भाईपरमानन्दस्य स्थितिं यः अनुभवेत् यः जीवने एतावतानि आश्चर्यजनकानि परिवर्तनानि, जीवन-मृत्योः उच्चावचाः अनुभूताः स्युः सः एव तस्य मनोभावान् अवगच्छेत्।

विचारः आगतः यत् आर्यसमाजं गच्छामि। द्वारे किञ्चित् समयं यावत् स्थितः। सङ्केतेन एकं जनम् आहूय पृष्टम् – "भवान् भाईपरमानन्दस्य पत्न्याः गृहं जानाति?" तस्य सहयात्रिकः जनः भाईपरमानन्दं गृहं यावत् आनीतवान्। ३०अप्रैल्-दिनम् आसीत् गोधूलिसमयः व्यतीतः अन्धकारः व्याप्तः आसीत्।

पत्नी स्वामिनं दृष्ट्वा आश्चर्यचकिता जाता। हृदये चक्रवातानि उद्भूतानि तथापि पत्न्याः मुखतः एकः अपि शब्दः न निर्गतः! कियन्ति कष्टानि सोढ्वा द्वयोः पुत्र्योः पालनं कृतम् आसीत्! आरम्भे जनाः पत्नीं मेलितुम् अपि भयम् अनुभवन्ति स्म। महात्म-गान्धी तथा च मिस्टर एन्ड्रूयुझ् सदृशाः पवित्रगान् आत्मधारिणः जनान् मिलित्वा भाईपरमानन्दस्य मुक्तये बहुप्रयत्नाः कृताः आसन्। कदाचित् अस्याः देव्याः कृपावशात् एव भाईजी पुनः संसारम् आगतः। येन स्व-पत्न्याः सुख-दुःखयोः सहभागी भवितुं शक्नुयात्।

भाईपरमानन्दः विश्रान्तिं कुर्वन् गृहे उपविष्टः। स्वजन्मभूमि-लाहोरस्य स्मरणं कदाचित् सेल्युलर्-कारागारे भवति स्म। उच्यते हि यत् मर्यादापुरुषोत्तम-श्रीरामस्य पुत्रेण लवेन नगरमिदं स्थापितम्। इदं तदेव लाहोरनगरं यत्र कदाचित् राजा जयपालः राज्यं करोति स्म। अयं स एव राजा अस्ति यः पराजयम् असह्य स्वपुत्राय राज्यं दत्त्वा स्वयं चिताम् आरूढवान्। इदं तदेव लाहोरनगरं यस्य महिलाः स्वमङ्गलसूत्रसहितानि आभूषणानि विक्रीय चरखाचक्रं चालयित्वा सैन्यस्य

साहाय्यं कृतवत्यः ।

लाहोरस्य वीथिकासु गुरुः अर्जुनदेवः रमणं कृतवान्। यत्र गुरु–गोविन्दसिंहः आगत्य मिया–मीरेण सह मित्रतां स्थापितवान्। यत्र भक्तः छज्जुः अभवत्। अस्यां भूमौ एव राजा–रणजितसिंहः राज्यं कृत्वा शीक्ख–साम्राज्यस्य आरम्भं कृतवान्। इयं सा भूमिः आसीत् यत्र जल्ला–पण्डितः, राजादीनानाथः, बक्षीभगतरामसदृशाः साहसिकाः वीराः निर्भयपुरुषाः उत्पन्नाः ।

आम्! तदेव लाहोरनगरं यत्र स्वामिदयानन्दः आर्यसमाजस्य सुदृढं प्रारोपणं कृतवान् । यतः आर्यसमाजः स्वतेजसा मुस्लिमजनान् दूरीकृतवान् । एतादृशं लाहोरनगरं पुनः द्रष्टुम् इच्छति स्म भाईपरमानन्दः। सः स्वप्नः साकारः अभवत्।

अलम् ! अधुना भाईजी स्वजन्मभूमिं करियालाग्रामं, तालुकचकवालः, जनपदं जेलम्, द्रष्टुम् अधीरः अभवत्। प्राप्तः करियालाग्रामम्!

ooooo

१८

सिद्धान्तनिष्ठाया: अर्चकः

भाईपरमानन्दः कानिचित् दिनानि स्वजन्मभूमौ उषित्वा काश्मीरं गन्तुम् प्रस्थितः। १९०३मध्ये केवलं कम्बलं नीत्वा जम्मुतः श्रीनगरं, ततः मुझफ्फराबादतः एबटाबादस्य पदयात्रा कृता। अस्मिन् गमने कारयानेन काश्मीरं गतः। विकटोपत्यकासु अननुभविनः कारचालकस्य कारणेन यानं प्रस्तरेण सह आस्फालितम् येन ५-६दिनानि मार्गे एव स्थेयम् अभवत्। सद्भाग्येन प्राणाः रक्षिताः।

काश्मीरस्य प्राकृतिक-सौन्दर्येण भाईजी प्रसन्नताम् अन्वभवत्। काश्मीरी-ब्राह्मणमहिलानां बालकानां च भालेषु तिलकं गलेषु यज्ञोपवीतेन भाईपरमानन्दः आकृष्टः जातः । स्वादार्थं पिष्टपिण्डे लवणमिव काश्मीरे ब्राह्मणाः अवशिष्टाः आसन्। काश्मीरीब्राह्मणाः यानि कष्टानि विपत्तीः च सोढ्वा धर्मरक्षां कृतवन्तः तेन भाईजी आश्चर्यान्वितः आसीत्।

बालकानां भालेषु तिलकं दृष्ट्वा भाईपरमानन्दः गुरुतेगबहादुरस्य बलिदानं स्मृतवान्। सहैव गुरुगोविन्दसिंहस्य पंक्तयः स्मृतिपटलम् आरूढाः। -

कीनो बडो कलु में साका

तिलक जञ्जु राखा प्रभु ताका।

काश्मीरयात्रा समये भाईजी सद्यः बालगङ्गाधरटिळकस्य स्वर्गवासस्य समाचारं श्रुतवान्।

काश्मीरयात्रानन्तरं भाईपरमानन्दः ज्ञातवान् यत्- कोंग्रेसस्य विशेषम् अधिवेशनं कोलकातामध्ये भविष्यति। भाईजी देशे आगामि परिवर्तनं द्रष्टुं तीव्रतया इष्टवान्। विशतिः वर्षानन्तरं कोंग्रेसस्य अधिवेशने उपस्थितः भवितु भाईपरमानन्दाय अवसरः लब्धः। अधिवेशनम् आगतानां सर्वेषां मुखोपरि भाईजी अदम्यम् उत्साहम् अन्वभवत्। अस्य उत्साहस्य दातुः टिळकस्य स्वर्गवासः जातः। अधिवेशने तस्य उपस्थितिः केवलेन विराट् तैलचित्ररूपेण आसीत्। कोंग्रेसं महाशक्तिरूपेण स्थापनाय टिळकजी

समग्रं जीवनम् अर्पितवान्। भाईजी स्पष्टतया मन्यते स्म यत् टिळकस्य अस्य योगदानस्य प्रशंसा कर्तव्या। तदर्थं च टिळकः कॉंग्रेसस्य प्रमुखत्वेन वरणीयः। किन्तु यदा तस्य प्रमुखत्वस्य संभावना आसीत् तदा टिळकस्य जीवनलीला समाप्तिं गता।

भाईपरमानन्दस्य अवलोकनम् आसीत् यत् देशः अधुना महात्मगान्धिनं प्रति दृष्टिं साधयित्वा स्थितः अस्ति। अस्य देशस्य निर्धनाः, धनिकाः, महिलाः, पुरुषाः, आबालवृद्धाः, नगरस्य वणिजः, ग्रामस्य कृषकाः सर्वे अपि महात्म–गान्धिनः नाम्ना उन्मत्ताः सञ्जाताः। महात्मनः हृदयस्य विशालता तथा च उदारतायाः कारणेन हि समग्रदेशे तस्य गणना अवतारपुरुषरूपेण भवति स्म इति भाईपरमानन्दस्य निष्कर्षः आसीत्।

सेल्युलर्‌कारावासतः मुक्त्यनन्तरं भाईपरमानन्दस्य अवलोकने अपरमपि महत्त्वपूर्णं तथ्यम् आगतं यत् समग्रदेशे आर्यसमाजस्य पृष्ठगतिः दृष्टा। भारतस्य सार्वजनिक–जीवने आर्यसमाजेन नेतृत्वं नीतम्, यदा जनाः सुषुप्तावस्थायाम् आसन् तदा तेषां जागरणोपायाः आर्यसमाजेन कृताः, किन्तु यदा जनजागृतिः उद्भूता तदा आर्यसमाजस्य पश्चाद्गतिः दृष्टा।

स्वामिदयानन्दस्य स्वहिन्दुजातेः सभ्यतां प्रति, धर्मं प्रति च निरवधि प्रेम आसीत्। स्वामिनः निष्कर्षः आसीत् यत् विभिन्नमतानि पन्थानः च देशस्य उत्कर्षे बाधारूपाः भवन्ति। दयानन्दः एतान् पथः मतानि च एकस्मिन् धर्मे आनेतुम् इच्छति स्म। अस्य धर्मस्य आधारः परोपकारः सत्यतापूर्णं जीवनं च भवेत् तादृशः स्वामिनः प्रयासः आसीत्।

भाईपरमानन्दः अन्वभवत् यत् आर्यसमाजस्य कार्ये गतिरोधस्य कारणम् आसीत् यत् आर्यसमाजस्य नेतारः तात्कालिकलाभार्थं सिद्धान्तानां बलिं दत्तवन्तः। भाईजी मन्यते स्म यत् अस्माकं धर्मः स्पष्टं बोधयति यत् आदर्शाः कदापि न त्याज्याः। भवतु नाम कियान् अपि लाभः भवेत्।

भाईपरमानन्दः स्वसङ्घर्षमयजीवनस्य निष्कर्षं निष्कासितवान् यत् जीवनस्य सार्थकता सिद्धान्तेषु विचारेषु च अस्ति। लाभे आरामे च नास्ति। क्षणिकलाभः

अस्माकं नेत्रयोः समक्षम् आगत्य अन्धकारं प्रसारयति येन च वयं भावि द्रष्टुम् असमर्थाः भवामः ।

भारतस्य राजकीयचित्रे भाईपरमानन्दस्य सुविचारितं मतम् आसीत् यत् मुस्लिमजनाः राजकीयसङ्घर्षे रूढाः जातिवादिनः मुस्लिमाः भूत्वा भागं गृह्णन्ति । शिक्खसमुदायः अपि पक्कः शिक्खः भूत्वा रणाजिरे अवतीर्णः, केवलं हिन्दवः हि तादृशाः सन्ति ये राजकीयकार्यसमये धार्मिकविचारान् दूरे स्थापयन्ति ।

भाईपरमानन्दः इच्छति स्म यत् हिन्दवः मुसलमानैः अन्यैः च सह भवन्तु नाम स्वप्रेमवर्धनं कुर्वन्तु, किन्तु तेन सह हिन्दवः स्वास्तित्व धारयेयुः तदपि अत्यावश्यकम् अस्ति । भाईजी चर्चायां कथयति स्म यत् – हिन्दवः स्वात्मानं नष्टं कृत्वा दुर्बलं वा विभाव्य अन्यान् प्रेम कथं करिष्यन्ति ? एतादृशाः हिन्दवः स्वकृते देशार्थं वा किं करिष्यन्ति ?भाईजी साग्रहं मन्यते स्म यत् हिन्दूनां सभ्यता धर्मः च इत्युभौ हिन्दुसमाजस्य आत्मरूपौ । अयमात्मा जीवयितव्यः रक्षणमिति तस्य कृते नितान्तम् आवश्यकम् ।

ooooo

१९

विभक्तभारतं चिरप्रयाणस्य निमित्तम्

महात्मगान्धी मुस्लिमजनान् कोंग्रेसदले मेलायितुं खिलाफतआन्दोलने स्वात्मानं योजितवान् । अनेन भाईपरमानन्दस्य आत्मा विद्रोहं कृतवान् । अस्य विद्रोहस्य व्यथां प्रकटयन् भाईपरमानन्दः सिंधप्रान्तीयहिन्दुसम्मेलनं सम्बोधयन् १९३०वर्षे ज्ञापितवान् यत् "मुस्लिमजनानाम् अन्तिमं लक्ष्यं पाकिस्तानं रचयित्वा भारतमातुः विभाजनस्य अस्ति ।" स्वीयं स्पष्टम् अभिप्रायं व्यक्तं कर्तुं भाईजी वर्धायां १९३३तमे वर्षे गान्धिनं प्रत्यक्षं मिलितवान् ।

भाईपरमानन्दस्य सुस्पष्टं मतमासीत् यत् वर्गविशेषस्य तुष्टीकरणस्य अयं मार्गः राष्ट्रियस्वतन्त्रतायाः आन्दोलनं गतिमत् -अपेक्षया क्षतिग्रस्तं करिष्यति । पदं,सन्मानं,लोकेषणा-इत्यादितः विमुखः भूत्वा भाईजी स्वमते निश्चलः स्थितः ।

महात्मगान्धी यदा सिद्धान्तं स्थापितवान् यत् - "हिन्दुमुस्लिमानां एकत्वं विना स्वराजप्राप्तिः सम्भविता नास्ति ।" तदा महादेशभक्तः भाईपरमानन्दः उद्घोषं कृतवान् यत् "हिन्दुजनानां प्रबलं सङ्घटनम् इति अयमेव स्वराजप्राप्तेः एकमात्रः मार्गः अस्ति इति ।"

कोंग्रेसद्वारा जातीयकसिद्धान्तस्य स्वीकारः जातः अतः भाईपरमानन्दः हिन्दु-महासभायै पूर्णतः समर्पितः जातः । हिन्दुमहासभायाः अध्यक्षपदमपि शोभितम् । जीवनस्य अन्तिमश्वासं यावत् महासभया सह युक्तः स्थितः ।

१९४५तमे वर्षे हि भाईपरमानन्दः भारतविभाजनस्य आशङ्कां दर्शितवान् । गान्धीजी घोषणां कृतवान् यत् पाकिस्तानं तस्य मृतदेहस्योपरि भविष्यति । पण्डितनहेरुः पाकिस्तानस्य परिकल्पनां मूर्खतापूर्णां गणितवान्, किन्तु ७अक्तूबर१९४५दिने भाईपरमानन्दः लिखितवान् यत् -

'एकत्र पडिण्तजी तथा घोषयति यत् स तस्य सहयोगिनः च भारतस्य विभाजनं कदापि न कारिष्यन्ति किन्तु अपरत्र एकेन श्वासेन तदपि वदति यत् यदि मुस्लिमजनाः भारते निवसितुं न इच्छेयुः चेत् ते बाध्याः न भविष्यन्ति । अतः अहम्

अत्र अद्य एव इत्थं कथयितुम् अनुमतिम् इच्छामि यत् सः समयः निकटम् आगतः अस्ति यत् इमाः वार्ताः कुर्वन्तः इमे नेतारः पाकिस्तानस्य निर्माणाय स्वीकृतिं दास्यन्ति इति ।'

भारतवासिजनाः भाईपरमानन्दस्य इमां भविष्यवाणीं श्रुत्वा किमपि सुनिश्चितं कार्यं कृतवन्तः स्युः चेत् ? भारतस्य भूगोलः इतिहासः च भिन्नौ अभवताम् !

'बस बहुत सब हो चुकी है
शान्ति की चर्चा यहाँ पर
हो चुकी अति ही अहिंसा
सत्य की चर्चा यहाँ पर
ये मधुर सिद्धान्त रक्षा देश की
पर कर न पाये
ऐतिहासिक सत्य है यह
सत्य अब पहचानना है । '

भाईपरमानन्दस्य हृद्गताः उपरोक्ता काव्यपंक्ति सदृशः भावनाः न कोऽपि अवगन्तुं पारितवान् । परिणामतः भारतमातुः रक्तरञ्जितं विभाजनं स्वीकरणीयम् अभवत् ।

अखण्डभारतार्थं समर्पितजीवः भाईपरमानन्दः भारतविभाजनस्य आघातं सोढुं न शक्तवान् । १८दिसम्बर्१९४७दिने अयं महातपस्वी जलन्धरे स्वीयान् श्वासान् त्यक्तवान् ।

प्रातःस्मरणीय भाईपरमानन्दः महतः भारतस्य देश गणमान्येषु महापुरुषेषु अन्यतमः आसीत्, यः उच्चकोटिस्थसन्यासिसदृशं स्वजीवनस्य परमलक्ष्यं प्राप्तवान् । सूर्यवत् अन्येषां सत्यमार्गस्य दर्शनं कारितम् । स्वयं धार्मिकजीवनस्य उपलब्धिं कृत्वा सहस्त्रशः जनान् सन्मार्गं प्रति प्रेरितवान् । परोपकारः एव तस्य जीवनव्रतम् आसीत् । हिन्दूनां स्वदेशस्य च हितकामना हि तस्य एकमात्रं साधना आसीत् ।

००००

ISBN -

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info